THE

SHÂSTRA-SIDDHÂNTA-LESHA

TÂTPARYA-SANGRAHA

(A prose abridgment of Appaya Dîkshita's Siddhânta-lesha-Sangraha.)

BY

VÂSUDEVA-BRAHMENDRA-SARASVATÎ.



EDITED BY

TANASUKHARÂMA M. TRIPÂṬHI.



PUBLISHED BY

PANDITA JYESHTHÂRÂMA MUKUNDAJI.

PRINTED AT THE "NIRNAYA-SAGAR" PRESS,

BOMBAY.

1908.

श्रीवासुदेवब्रह्मेन्द्रसरस्वतीविरचितः

शास्त्रसिद्धांतलेशतात्पर्यसंग्रहः

(अप्पयदीक्षितविरचितसिद्धांतलेशसंग्रहस्य साररूपः)

नडीयादनिवासिना

तनसुखराम मनःसुखराम त्रिपाठी

इत्यनेन कृतमुद्रणसंशोधनः

मुंबाइपुरस्थ पंडित ज्येष्ठाराम मुकुंदजी इत्यनेन

प्राकाश्यं नीतः ॥

मुम्बापुरस्थ-निर्णयसागरमुद्रालये मुद्रितः

वि. सं. १९६४

INTRODUCTION.

(The Aims of Life.)

The different aims for the attainment of which mankind strives through life (पुरुषार्थ) fall under one of the four classes ; viz:—(1) धर्म *i. e.* the performance of acts religious or moral conducing to mental happiness; (2) अर्थ *i. e.* the acquisition of wealth calculated to enable the person obtaining it to enjoy earthly pleasures or to perform meritorious and charitable actions with its assistance; (3) काम *i. e.* the satisfaction of one's various desires; and (4) मोक्ष *i. e.* the attainment of final emancipation, whereby man is freed from the necessity of re-births in consequence of his actions good or bad, or for the commital of fresh acts with a view to experience the due fruits thereof.

It is obvious that the highest aim should be the last above-mentioned, as it is pre-eminently 'Moksha' which leads one to the state of perfect happiness.

(The Three Paths)

(Ethics-Religion-Philosophy.)

The real means to it is a knowledge of the Absolute Truth. (परमार्थसत्य). All the various religions and philosophies of the world which are so many attempts to realize truly the unseen—the final cause—the God, are either some one or other of what the Âryan Philosophers designate as (1) कर्मयोग, (2), उपासनायोग or भक्तियोग, and (3) ज्ञानयोग.

Among religions (by which term may be understood a sort of philosophy with an essential ceremonial adjunct), some (not accepting the view of a personal Godhead) recommend and prescribe, as the best means to attain the goal,

certain ceremonials, or strict adherence to rules of morality ; while others preach belief in a Personal God, and his service according to certain forms as the only means of final salvation. These respectively correspond to 'Karma-yoga' and 'Bhakti-yoga'.

All philosophies (by which term may be understood a sort of religion purely mental, religion divested of its ceremonial feature) are a kind of 'Jnâna-yoga'.

(*Religion and Philosophy in the West.*)

Every founder of religion or philosophy in the West preached what he conceived to be the truth and claimed for it the right of true solution. In the struggle for self-existence even in the region of non-physical plane, some even went so far as to undermine religion as something antagonistic to reason. But as the ever-progressive history indicates, every philosopher and layman, in course of time, finds the light of one beacon either extinguished or falsified by that of a later one, it, in its turn, existing ever in fear of the same fate at the hands of a future one. With this experience before one, it is not to be wondered at if the earnest seeker after truth, pauses at the outset, before accepting Kant or Spencer or any other of the Western Philosophers as an infallible guide and 'philosopher.'

(*The Six Âryan Systems of Philosophy.*)

Very different from the above, has been the case with the Aryan Systems of Philosophy and religion, which are understood as always going hand in hand, helping each other to a common end.

From times immemorial, the Vedas have been accepted as the fountain-head of all knowledge—knowledge otherwise unobtainable by man, having regard to the normal imper-

fectly-developed condition of the senses and the mind—the only recognised means to knowledge. Relying on the Vedic texts as the guide in their endeavour to disclose the supreme truth (परमार्थसत्य), and attended with the lights of inference or indirect cognition (अनुमान) and experience or direct cognition (प्रत्यक्ष or अनुभव)—the unerring final test, the Aryan Seers of Truth (the Rishis) have taught six ways or means for the preception (दर्शन) of the Truth, five of which may be considered preparatory to the correct understanding of the sixth and the last, known as the Vedânta.

The first five 'Darshanas' may be differentiated from one another, like the five senses, by the speciality they display in the fulfilment of their common end. The 'Nyâya' system principally concerns itself with teaching the method of arriving at correct conclusions. The 'Vaisheshika' lays stress on the doctrine of 'particularity or individual essence.' The 'Sânkhya' system advances some steps further and going beyond the results to be attained by means of the physical senses, inquires more minutely into the nature of the Soul. The 'Yoga' is more practical in its teachings and shows a number of ways to train the mind so as to befit it to grasp that which, with the unaided power of the senses or with a mind not properly trained, it is impossible to comprehend. The fifth, namely the Mîmânsâ, while professing to discuss Dharma (religious and moral injunctions) shows the correct methods of interpreting the scriptural texts, and reconciling seeming contradictions in them.

Thus the five 'Darshanas' unitedly try to expound the several requisities necessary for understanding correctly the deep Vedic Texts (which make for the first time

known that which is unknown and unknowable in other ways), and to lead men to correct conclusions, and to so educate the mind as to enable it to perceive and realise for itself the ultimate Truth (Brahma) and convince itself that it has grasped the Truth and nothing but the Truth.

(*The Vedânta Philosophy.*)

A study of the five 'Darshanas', in short, fully prepare a man for that of the last—the Vedánta, the principles of which are laid down in the "Upanishads", and popularly taught in the "Bhagvad-Gîtá", and systematized in the Vedânta-sutras". The Vedánta Philosophy mainly discusses and teaches the true nature of the world (which though is the object of perception and seems true to all intents and purposes, has yet its very existence doubted by many); the Self—the Soul (as to the existence of which there is and can be raised no doubt whatever by any); and Brahman—the one and the only principle—the substratum of all phenomena, not different from the Self in essence. The Vedânta Philosophy has, after a careful and thorough inquiry regarding the causes and the nature of these three seemingly-separate existencies, proved very ably and subtly that the whole world is ideal, an idea merely, and that the only true or a real thing is the Self.

Although Râmânuja and some others, basing their tenets on different interpretations of the Upanishads &c. call their theories also the Vedánta, yet it is well-known that their teachings are those of Upásaná (worship of a particular personal god) with different substitutes for "the worshipped," and thus such as they on the whole breathe more of religion than philosophy, unlike S'ankara who holds forth

'Jnána' or the True Knowledge as the cause of obtaining 'Moksha' or in other words realizing the greatest aim of life.

(Minor Differences in the Vedânta.)

Although almost all its exponents are agreed as to the fundemental principles underlying this important subject, yet there exist considerable differences of opinion in regard to some minor points of more or less importance.

As is natural, a vast literature of an elementary as well as controversial nature has naturally sprung up dealing with these subjects. Those works of the Vedânta which are elementary in their nature are called "Prakaranas" "(प्रकरणग्रंथ); such as Panchikarana, Vedânta-Sara, &c. While those that discuss exhaustively the principles of the Vedânta and enter into the arguments and authorities in support of their teachings are called "Prameya" (प्रमेयग्रंथ), such as the commentaries of S'ri S'ankaracharya &c. There is yet another class of very subtle writings called "Âkaras" (आकरग्रंथ) which concern themselves mainly with replying to or questioning the arguments of the opponents to the conclusions of the Vedánta Philosophy, and which attack and seek to demolish the teachings of other schools. To this class belong such works as the famous Khandana-khâdya, Advaita-Siddhi &c.

(The Present Work.)

Appaya Dikshita, a renowned scholar and voluminous writer of the 16th Century, in an unique and very valuable work called "Siddhânta-lesha-sangraha" made for the first time, from the works of his numerous predecessors, a collection of different opinions on several Vedântic topics, arising from different standpoints, and recapitulated arguments in support of each. The work has a very learned commentary

by 'Achyuta-Kṛishṇânanda-Tirtha.' The work was abridged in mnemonical verses (Kárikás) by Sadáshiva Brahmendra Sarsvati, in a work called 'Siddhânta-Kalpavalli.'

The present work is an admirable abridgment in prose of that very useful and large work "Siddhânta-lesha-sangraha," and comes under the class of "Prameya" works and is intended as introductory to or a help in the study of the larger one.

(*The Author.*)

Its author Vâsudeva-Brahmendra-Sarasvati, is living on the bank of the Káveri river, as a typical Sannyâsin, and a 'Jîvan-Mukta,' passing his days in blissful meditation, and at other times in imparting to others the knowledge (ज्ञान) and experience (अद्वैत-अनुभव) he has gained.

Nágaravádá
Nadiâd.

T. M. TRIPÂṬHI.

॥ उपोद्घातः ॥

इह हि स्वप्नेन्द्रजालमरुमरीचिकायमानसंसारार्णवे बुद्बुदवदाविर्भूय तिरोभवतामनन्तकोट्यण्डानां एतर्हि एकतमे चतुर्दशभुवनात्मकेऽस्मिंश्चतुरशीतिलक्षजातिभेदभिन्ने प्राणिनिकुरम्बेऽजस्रं जननमरणादिप्रबन्धचक्रे उच्चावचदेवतिर्यगादियोनिष्ववशोऽविद्याकामकर्मादिवशगः सर्वो जन्तुर्घटीयन्त्रवदनिशमनादिकालमारभ्य बम्भ्रम्यते। नास्य निवृत्तिरेव नास्ति, अनात्मत्वान्मायिकत्वाच्च। "अतोऽन्यदार्तम्" "नतु तद्द्वितीयमस्ति" "नेह नानाऽस्ति किञ्चन" इत्यादि श्रुतिभ्यः ॥

अविद्यानिवृत्तिरेव मोक्षः ॥

"न मोक्षो नभसः पृष्ठे न पाताले न भूतले।
सर्वाशासङ्क्षये चेतःक्षयो मोक्ष इतीष्यते" इति वसिष्ठवचनात् ॥

मोक्षस्य च निरतिशयनिःश्रेयस अनित्यत्रिवर्गापेक्षया परमपुरुषार्थत्वं युक्तम्, अकृतकत्वात् नित्यसिद्धस्वरूपत्वाच्च। "तद्यथेह कर्मचितो लोकः क्षीयते" "न च पुनरावर्तते" "नामरूपाद्विमुक्तः" इत्यादिश्रुतेः ॥ स च मोक्षो नापूर्वः किन्तु रोगार्तस्य रोगनिवृत्तौ स्वस्थतावत् कर्तृत्वाद्यनर्थहेत्वविद्यानिवृत्त्युपलक्षितनिर्विशेषस्वमहिमप्रतिष्ठारूपः। "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" "स उत्तमः पुरुषः" "यो वै भूमा तत्सुखं" "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतेः ॥

सा च अविद्या सहकारिसाधनान्तरनिरपेक्षनिर्विचिकित्सापरोक्षसा-

क्षात्कारनिवर्त्या"तमेव विदित्वाऽतिमृत्युमेति""तरति शोकमात्मविद्" "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।" इत्यादिश्रुतेः । "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।" इत्यादिस्मृतेश्च ॥ "न योगेन न सांख्येन कर्मणा नो न विद्यया (=उपास्त्या) । ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा" इति वृद्धवचनाच्च । कर्मोपासनयोस्तु फलाभिसन्धिशून्ययोश्चित्तशुद्धचैकाग्र्यादिद्वारा ज्ञानोत्पत्तौ विनियोगः ।

तच्च ज्ञानं वेदान्तैकप्रमाणजन्यम् । "वेदान्तविज्ञानसुनिश्चितार्थाः" "तन्त्वौपनिषदं पुरुषं पृच्छामि" इत्यादिश्रुतिभ्यः ॥

ब्राह्मणस्यैव तत्र मुख्याधिकारः प्रतीयते "ब्राह्मणो निर्वेदमायात्" "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादिश्रुतिभ्यः ॥

ब्राह्मणेष्वपि परिव्राजकस्यैव मुख्योऽधिकारः, अनुबन्धनिर्णायकजिज्ञासासूत्रेऽथशब्दार्थविचारावसरेऽन्वयव्यतिरेकाभ्यां साधनचतुष्टयसम्पत्त्यानन्तर्यस्य निर्णीतत्वात् ॥

गृहस्थादीनांच गौणोऽधिकारोऽस्त्येव अप्रतिषेधात् ।

"दिने दिने च वेदान्तश्रवणाद्भक्तिसंयुतात् ।

गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेत् ॥" इति अनुग्राहकस्मृतेश्च ॥ स्त्रीशूद्राणाञ्च विरक्तानां ब्राह्मणमुखात् वेदान्तार्थस्य स्मृतिपुराणद्वारा श्रवणेऽधिकारः स्मर्यते "श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः" इति ॥

वेदान्तानां बोधकताप्रकारो द्विविधः, प्रतिकर्मप्रक्रिया दृष्टिसृष्टचेक-

जीवप्रक्रिया चेति ॥ तत्राद्या सर्वप्रसिद्धा ॥ द्वितीया तु उत्तमाधिकारिविषया विरला। साचेत्थम्—"एकमेवाद्वितीयं सत्यज्ञानानन्तानन्दमविकृतं प्रत्यग्ब्रह्मैव स्वाभाविक्या स्वाविद्यया जीवेश्वरजगद्रूपेण स्वप्न इव जागरेऽपि विवर्तमानं जीवत्वभ्रान्त्या संसरतीव, तथैव स्वकल्पितगुरूपदिष्टवेदान्तमहावाक्यजनिताद्वैतात्मबोधेन मुच्यत इवेति"॥सर्ववेदान्तानां च परमतात्पर्यमत्रैव—"तदात्मानं स्वयमकुरुत" "बहु स्यां प्रजायेय" "सच्च त्यच्चाभवत्" "तत्सृष्ट्वा तदेवानुप्राविशत्" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "इहैवान्तःशरीरे सोम्य स पुरुषः""यो वेद निहितं गुहायां""तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" "एको देवः सर्वभूतेषु गूढः" "ब्रह्म वा इदमग्र आसीत्" "तदात्मानमेवावेदहं ब्रह्मास्मीति" "तस्मात्तत्सर्वमभवत्" इत्यादिश्रुतिशतेभ्यः। एवमेवोक्तं भाष्यवार्तिकयोः "व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यत" इति—(बृहदारण्यभाष्यम्)

"राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।
यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः॥" इति तद्वार्तिकम् ॥

आपस्तम्बस्मृतितद्व्याख्ययोरप्येवमेव दृश्यते "आत्मलाभान्न परं विद्यते" (प्रश्न १- पट० ८- खं०२३- सूत्र०२ ॥)

"नीचानां वसतौ तदीयतनयैः सार्धञ्चिरं वर्धित-
स्तज्जातीयमवैति राजतनयः स्वात्मानमप्यञ्जसा।

सङ्घाते महदादिभिः सहवसंस्तद्वत्परः पूरुषः
स्वात्मानं सुखदुःखमोहकलिलं मिथ्यैव धिङ्मन्यते ॥ १ ॥
दाता भोगपरः समग्रविभवो यः शासिता दुष्कृतां
राजा स त्वमसीति मातृमुखतः श्रुत्वा यथावत् स तु ।
राजीभूय जयार्थमेव यतते तद्वत्पुमान् बोधितः
श्रुत्या तत्त्वमसीत्यपास्य दुरितं ब्रह्मैव सम्पद्यते" ॥ २ ॥ इति व्याख्याने । एवमेव वासिष्ठवेदान्तसिद्धान्तमुक्तावलीसङ्क्षेपशारीरकादिग्रन्थेषु स्पष्टमुक्तं । विस्तरभयादुपरम्यते ॥

एवंच तत्तदाचार्याणां तत्तदधिकारिभेदेनोक्तमतभेदान् सङ्कृह्य शास्त्रसिद्धान्तलेशसङ्ग्रहाख्यं ग्रन्थं रचयामासुः सर्वतन्त्रस्वतन्त्रश्रीमद्**प्पयदीक्षिताः** ॥

तथा–तत्तन्मतस्य झटित्युपस्थितये कारिकात्मना चिकीर्षवः श्रीमत्परमहंसपरिव्राजकवर्य**सदाशिवब्रह्मेंद्रसरस्वत्यः** सिद्धान्तकल्पवल्ल्याख्यं सटीकं ग्रन्थं संग्रथयामासुरार्याप्रबन्धैः (२१२ पद्यैः) ॥

किञ्च **वासुदेवब्रह्मेन्द्रसरस्वत्यस्तु**,सिद्धान्तकल्पवल्ल्यां तत्तन्मतप्रमेयस्यातिसङ्क्षिप्योक्तत्वात् केषाञ्चिन्मतानां निरूपणस्यैवोपेक्षितत्वाच्च नेयमलं बोद्धुमिति, गद्यरूपेणैव सिद्धान्तलेशगततत्तन्मततात्पर्यमात्रं सङ्कृह्य शास्त्रसिद्धान्तलेशतात्पर्यसङ्ग्रह इतीमं ग्रन्थं आरचयांबभूवुः ।

अमी हि अतिबाल्ये पञ्चविंशतेरर्वागेव सन्न्यस्य सर्वकर्माणि तुरीयाश्रमं प्राप्य सद्गुरूनुपगम्याश्रमसम्प्रदायोपदेशपूर्वकं प्रस्थानत्रयमूलतद्भाष्यादिकं शान्तिपुरःसरं श्रुत्वा तदन्तिकेऽविनाभावेनैकविंशतिव-

ःसरानाविदेहकैवल्यं गुरूणामुषित्वाऽधुना श्रद्धाभक्तिध्यानशमाद्यलं-
कृताः कवेरजातटनिकटोटजकुटीरेषु वसन्तः पाठयन्तश्चाद्वैतभाष्यादीन्
मुमुक्षूणां तत्र तत्र भिक्षाचर्यं चरन्ति ॥

एतेषां गुरवः **कृष्णानन्देन्द्रसरस्वत्य** इति । ते तु स्वगुरूणां
कृपाकटाक्षादेव करतलामलकीकृतभाष्यार्थाः । शमदमदयामानित्वा-
देनिखिलनिवृत्तिप्रधानसाधनसपूर्णाः अद्वितीयगुरुभक्तिदीक्षाक्षतत-
मसो बभूवुः ॥

एतेषां गुरवस्तु **रामचन्द्रेन्द्रसरस्वत्य** इति । इमे हरिहरो-
पासनया सायं प्रातः मध्ये चाद्वैतार्थभाष्यप्रवचनेनैव कालया-
पनं चक्रुः ॥ अमीहि काञ्चीनगरविराजमानोपनिषद्ब्रह्मेन्द्रमठपरं-
परायां आद्योपनिषद्ब्रह्मेन्द्राणां प्रशिष्याः । **उपनिषद्ब्रह्मेन्द्रा** इति तु
नाम, इमे अष्टोत्तरशतोपनिषदः एकान्ते उपविश्याहोरात्रं पठन्तश्चि-
न्तयन्तश्च तदर्थं परमानन्दनिर्भरितास्ताभ्योऽष्टोत्तरसहस्रमहावाक्यान्यु-
द्धृत्य महावाक्यरत्नावलीसंज्ञकं ग्रन्थं तद्व्याख्यानञ्च रचयामासुरिति ।
ततस्तन्नाम्ना लोकप्रसिद्धिरभूत् ॥ आश्रमसम्प्रदाययोगपट्टाभिधा तु
रामचन्द्रेन्द्रसरस्वत्यः इत्येव । तथैव महावाक्यरत्नावलीसमाप्ता-
वुपलभ्यते ॥ एते अष्टोत्तरशतोपनिषदां च व्याख्यां चक्रुरिति श्रूयते ।
अद्यापि काञ्चीनगरमठे तत्पुस्तककोशे वर्तते विद्यारण्यकृतव्याख्या-
नीति प्रसिद्धिः ॥

वासुदेवब्रह्मेन्द्रचरणान्तेवास्यहं तत्पुस्तककोशादानीय तैः संशोध-
येत्वा ग्रन्थमिमं सर्वमुमुक्षुजनमित्रोपकृतये भवेदिति "एकः स्वादु

न भुञ्जीत" इत्यादिन्यायेन मुद्रापयितुं प्रयत्नमकरवम् । सर्वशास्त्रार्थानामत्र सङ्क्षिप्योक्तत्वात् वेदान्तार्थं बुभुत्सूनां विशिष्योपकुर्यादेवैतत् ॥

स्वात्मा हि सर्वेभ्यः पुत्रभार्यादिभ्यः प्रेष्ठः, अतस्तत्प्राप्त्युपाये वेदान्तश्रवणे यतनीयं इहैव जन्मनि ॥ "इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदीर्महती विनष्टिः" "य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति" इत्यादिश्रुतेः ॥

तथा भागवते—

"लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु याव-
न्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥" इति ।

तथा सुभाषितत्रिशत्यां—

"यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥" इति ॥

विवेकचूडामणौ चः—

"लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्तौ न यतेत मूढधीः
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥

"इतः को न्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषन्देहम्प्राप्य तत्रापि पौरुषम् ॥" इति शिवम् ॥
लभन्ते साधवः सारं त्यक्त्वाऽसारं यथेक्षुषु ।
मदुक्तिषु तथैवाऽस्तु साधवो दीनवत्सलाः ॥

* *

इदं ग्रन्थरत्नं तञ्जौरप्रान्तान्तर्गतगणपत्यग्रहारनिवासि 'जि. एस्. रामचंद्र ऐयर' इत्येतेषां प्रार्थनया मुंबापुरस्थसुप्रसिद्धपंडित-ज्येष्ठारामैः स्वभ्रातृव्यकालिदाससूचनया प्राकाश्यं नीतं । तत्राधस्तात् क्वचित् टिप्पणं मया मत्सुहृदा नानाशास्त्रावगाहरसिकेन श्री 'तनसुखराम त्रिपाठी' इत्यनेन च निवेशितं, तेनैव च मुद्रणसंशोनादिकार्यं परोपकारधिया निर्व्यूढम् । इत्यतो विविधश्रमाङ्गीकारेण एभिरस्य ग्रन्थस्य ग्राहका उपकृताइति विदितमस्तु ॥

कार्तिक शुक्ल सप्तमी
शालिवाहनशकाब्दाः १८२७
कोटिहत्यामोचनपुरम्-मायूरम् ॥

विधेयः
वैद्यनाथशास्त्री.

शास्त्रसिद्धान्तलेशतात्पर्यसंग्रहस्य

विषयसूचीपत्रिका

विषयसंख्या.	विषयाः	पृष्ठांकः
	(प्रथमपरिच्छेदे)	
१	आत्मश्रवणविधेः प्रकारतानिरूपणं	१
२	ब्रह्मलक्षणनिरूपणं	५
३	ब्रह्मणो जगत्कारणरूपत्वनिरूपणं	५
४	मायाकारणत्वश्रुतिगतिनिरूपणं.	६
५	जीव–ईश्वर–स्वरूपनिरूपणं	७
६	जीव–एकत्व–अनेकत्व–निरूपणं	९
७	प्रपञ्चस्य अविद्याकृतत्वनिरूपणं	११
८	ब्रह्मणः कर्तृत्वनिरूपणं	११
९	ब्रह्मणः सर्वज्ञत्वनिरूपणं	१२
१०	विषयावभासे वृत्त्युपयोगनिरूपणं	१३
११	विषयोपरागलक्षणनिरूपणं	१४
१२	अभेदाभिव्यक्तिस्वरूपनिरूपणं	१४
१३	आवरणाभिभवस्वरूपनिरूपणं	१५
१४	अज्ञानानां साद्यनादित्वनिरूपणं	१५
१५	अवस्थाज्ञानानादित्वपक्षे विषयप्रकाशनिरूपणं ...	१६
१६	धारावाहिकज्ञानस्थले द्वितीयादिज्ञानसफलतानिरूपणं	१६
१७	परोक्षज्ञानस्य अज्ञाननिवर्तकत्वनिरूपणं	१७
१८	साक्षिस्वरूपनिरूपणं	१९
१९	साक्षिणः अविद्यादिप्रकाशकत्वनिरूपणं	२१
२०	स्वरूपभूत–आनन्दादेरनावृतत्वनिरूपणं	२१

२१	अहंकाराद्यनुसंधानोपपत्तिनिरूपणं	२२
२२	सकारणाध्यासनिरूपणं	२३
२३	वृत्तिनिर्गमनिरूपणं	२५
२४	वृत्तिनिर्गमसफलतानिरूपणं	२६
२५	जीवब्रह्माभेदप्रमाणनिरूपणं	२७

(द्वितीयपरिच्छेदे)

१	अद्वैतसमन्वयस्य प्रत्यक्षेणाविरोधनिरूपणं	२८
२	श्रुतेः प्रत्यक्षात् प्राबल्यनिरूपणं	२९
३	उपजीव्यत्वेन प्रत्यक्षप्राबल्यशंकानिरासः	३०
४	प्रतिबिंबाध्यासनिरूपणं	३१
५	स्वप्नाध्यासोपादाननिरूपणं	३३
६	स्वप्नाध्यासाधिष्ठाननिरूपणं	३४
७	स्वप्नानुभवप्रकारनिरूपणं	३५
८	दृष्टिसृष्टिवादे प्रपंचकल्पकनिरूपणं	३६
९	तत्राहंकाराद्यध्यस्तत्वनिरूपणं	३७
१०	मिथ्यार्थस्यापि अर्थक्रियाकारित्वनिरूपणं	३७
११	प्रपंचमिथ्यात्वनिरूपणं	३८
१२	जीवानामभेदत्वनिरूपणं	३९
१३	तत्र सुखादिव्यवस्थानिरूपणं	३९
१४	तत्र सुखादिव्यवस्थाप्रयोजकोपाधिनिरूपणं	४१

(तृतीयपरिच्छेदे)

१	ज्ञानस्यैव मुक्तिसाधनत्वनिरूपणं	४३
२	तत्र कर्मोपयोगनिरूपणं	४३
३	तत्र अधिकारिनिरूपणं	४४
४	संन्यासस्य विद्योपयोगित्वनिरूपणं	४६
५	संन्यासे अधिकारिविशेषनिरूपणं	४७

६	अमुख्याधिकारिकृतवेदांतविचारस्य जन्मान्तरे विद्याजनकत्वनिरूपणं	४९
७	श्रवणाद्यशक्तस्य विद्याप्राप्त्युपायनिरूपणं	५०
८	ब्रह्मसाक्षात्कारे करणनिरूपणं	५०
९	महावाक्यस्य अपरोक्षज्ञानजनकत्वनिरूपणं	५१
०	मूलाज्ञाननिवृत्तिप्रकारनिरूपणं	५३
१	ज्ञानेन उपादानबाधकत्वनिरूपणं	५५
२	चरमसाक्षात्कारनिवृत्तिप्रकारनिरूपणं	५५

(चतुर्थपरिच्छेदे)

१	अविद्यालेशस्वरूपनिरूपणं	५८
२	अविद्याध्वंसस्वरूपनिरूपणं	५८
३	अविद्यानिवृत्तेः क्षणिकत्वनिरूपणं	६०
४	नित्यप्राप्तस्यापि आनंदस्य प्राप्तिनिरूपणं	६१
५	मुक्तिदशायां मुक्तस्वरूपनिरूपणं	६२

शुद्धिवृद्धिपत्रिका

पृष्ठे	पंक्तौ	शुद्धादिपाठः
३	६	°परोक्षज्ञानजनकत्व**मेव** श्रवण**स्येत्य**त्रैव
,,	१७	°सहकारि**त्वेनै**
,,	२०	°**शा**ब्दज्ञानरूप–
७	३	अध्य**स्ता**
,,	११	°मनपर्ं,न°
८	१७	°एवं, नह्य°
९	१५	अन्तःकरणाव°
१०	११	°व्यवस्थार्थं अ–
,,	१७	मनोनाशे न
,,	२०	सर्वजीव°
१३	१४	°दन्तःकरण°
१६	१	°ज्ञानेनैक°
,,	२	°भावात्सर्वा°
,,	८	°भवतीति[1]
,,		(पृष्ठाधः टिप्पनं—१ ननु श्रवणविचारावसरे कथं मननिदिध्यासनयोः मतद्वये विधिविषयत्वमुक्तं, ननु श्रवणस्येति चेत् —उच्यते । पूर्वमते–स्वतः परोक्षज्ञानार्थत्वेन, साधनविशेषसहकारितया तु अपरोक्षज्ञानार्थत्वेन च श्रवणे नियमविधिः । द्वितीयमते परोक्षज्ञानार्थत्वेनैव श्रवणे नियमविधिरिति मूले स्पष्टत्वात् ॥
१८	१३	**विषयचैतन्यगतमेव**
१९	१८	जगद्रूप–
२४	५	ज्ञानाविष–

२५	१९	°वृत्त्यव°
२८	४	,°घटःसन्निधि-
,,	१९	स्वरूपत्वेन
२९	१३	वृत्तिर°
३०	१५	°मेव शाब्दप्रत्यक्ष°
३१	८	°तस्यानिषे°
३२	१	°भाक्त्वानु°
,,	१५	°भाक्त्वोप°
३६	१२	°नादित्वा°-
,,		(१३-१४ योर्मध्ये गलितपूरणं—

ननुएवं जाग्रत्प्रपञ्चस्य स्वप्नप्रपञ्चवद् दृष्टिसृष्टित्वाङ्गीकारे परोक्षप्रतीतिविषयवियदादिसर्गप्रलयादिक्रमप्रतिपादकश्रुतिमात्रस्य का गतिः, कोवा वियदादिकल्पक, इति चेत्—

अत्राह दृष्टिसृष्टिवादी—यथा लोके गगनतत्त्वं बुबोधयिषुः प्रथमं नैल्याध्यारोपविशिष्टत्वेन नीलं नभ इति गगनं बोधयित्वा पश्चात् न इदं नैल्यादियुक्तं, किन्तु निरूपं व्यापकमुदासीनं स्वगतभेदशून्यमिति यथार्थं बोधयति, एवं वेदान्ता अपि प्रथमं वियदादिसर्गप्रलयादिकारणं ब्रह्मेति अध्यारोपन्यायेन मन्दमतीन् प्रति कर्मप्रक्रियया ब्रह्म ग्राहयित्वा पश्चात् अपवादन्यायेन नेतिनेतीत्यादिना भेदमात्रं निषिध्य अतद्व्यावृत्त्या निष्प्रपञ्चं केवलं प्रत्यगभिन्नं ब्रह्माद्वयं लक्षयन्ति। तथा च सृष्ट्यादिवाक्यानां निषेधवाक्यापेक्षितनिषेध्यसमर्पकतया तदेकवाक्यतामापद्य निष्प्रपञ्चप्रत्यगर्थे एव तात्पर्यं, न तु स्वार्थसृष्ट्यादौ, प्रयोजनाभावादर्थवादवत्। एतेन कल्पकविषयप्रश्नोऽपि निरस्तः, वियदादेरभावादेवेति ॥

३८	१२	,उदकार्थिनः (इति पाठान्तरं)

॥ ॐ ॥

॥ शास्त्रसिद्धान्तलेशतात्पर्यसंग्रहः ॥

अथ प्रथमपरिच्छेदः ॥

ब्रह्माद्वैतन्निखिलनिगमान्तार्थशुद्धस्वरूपञ्
जीवाभिन्नं सकलजगताङ्कारणम्मायया यत् ।
तत्त्वं हीति प्रथितकृपया बोधितो यत्कटाक्षात्
तस्मै मह्यम्परमगुरवे क्षेमधाम्ने नमस्ये ॥ १ ॥
इदानीमध्यात्मश्रवणमननध्यानसरणिं
विनायासम्बोद्धुं विविधमतसिद्धान्तनिकरान् ।
विविच्याहं सम्यक् सरलपदवाक्यैस्तदुदितं
लिखाम्येवं सारं मम हृदयनैश्चल्यकृतये ॥ २ ॥

॥ (१) ॥

इह खलु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादिवेदान्तवाक्येषु श्रूयमाणो विधिः किंविधिरिति चिंत्यते ॥ तत्र हि त्रयो विधयः सन्ति ॥

कथमपि केनापि कदापि विनाविधिम्प्राप्तिरहितस्य प्राप्तिफलको विधिरपूर्वविधिः--यथा व्रीहीन् प्रोक्षतीत्यादिः प्रथमः ॥

कदाचिदेव प्राप्तस्याप्राप्तांशपरिपूरणफलको विधिर्नियमविधिः--यथा व्रीहीनवहन्तीत्यादिः द्वितीयः ॥

नित्यंप्राप्तौ इतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः--यथा पंच-पंचनखा भक्ष्या इत्यादिः तृतीयः ॥

(१) तत्र प्रकटार्थकाराद्याः आहुः—वेदान्तश्रवणम्ब्रह्मसाक्षात्कारहेतुरिति प्रमाणान्तरेणात्यन्तमज्ञातत्वादपूर्वोऽयं विधिरिति ॥

(२) अपरोक्षवस्तुविषयप्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वकृप्त्या वेदान्तश्रवणस्य नित्यापरोक्षब्रह्मसाक्षात्कारहेतुत्वप्राप्तेर्नापूर्वोऽयं विधिः—किन्तु अध्ययनगृहीतवेदान्तैर्मनसाऽहमिति गृह्यमाणे जीवे उपदिष्टं निर्विशेषब्रह्मचैतन्यरूपत्वमाकर्ण्य तत्साक्षात्कर्तुन्तत्रैव कदाचित्सावधानम्मनःप्रणिदधानस्य पुरुषस्य वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी स्यात् । तन्मा भूदिति वेदान्तश्रवणनियमविधिरेवायमस्तु ॥

अथवा—भिन्नात्मज्ञानान्मुक्तिरिति भ्रान्त्या तदर्थन्द्वैतपरशास्त्रान्तरश्रवणेपि पक्षेप्रवृत्तिसम्भवात् तद्वारणायाद्वैतात्मपरवेदान्तश्रवणेऽस्त्वयन्नियमविधिः ॥

अथवा—स्वाध्यायग्रहणे यथा लिखितपाठादिव्यावृत्तये गुरुमुखाधीनाध्ययननियमविधिः । तथा शास्त्रान्तरकुशलस्य स्वप्रयत्नसाध्यस्यापि वेदान्तविचारस्य ब्रह्मसाक्षात्कारहेतुत्वव्यावृत्तये गुरुमुखाधीतवेदान्तश्रवणनियमविधिरस्तु ॥

अथवा—शास्त्रव्युत्पत्तिहीनस्य बहुशो भाषांतरप्रबन्धेनाद्वैतात्मविचारे प्रवृत्तिप्रसक्तौ तद्व्यावृत्तये वेदान्तविचारनियमविधिरस्तु ॥

अथवा—कर्मसु कल्पसूत्रकारादिवाक्यानामपि मन्त्रवत्पक्षप्राप्तौ मन्त्रैरेव मन्त्रार्थः स्मर्तव्य इति नियमविधिर्नियमादृष्टाय यथा, तथा वेदान्तमूलेतिहासपुराणस्मृतिपौरुषेयप्रबन्धानामप्यद्वैतात्मविचारे प्राप्तौ वेदान्तविचारनियमविधिरस्त्विति विवरणानुसारिणस्त्वाहुः ॥

(३) स्वतः परोक्षज्ञानजननसमर्थस्यापि शब्दस्य मननानिदिध्यासनसाहाय्यात् भावनाप्रचयसहकृतविधुरान्तःकरणस्य कामिनीसाक्षात्कारजनकत्ववत् अपरोक्षज्ञानजनकत्वस्य लोकतः प्राप्तत्वान्नापूर्वविधिः—किन्तु पूर्ववन्नियमविधिरिति विवरणैकदेशिनः प्राहुः ॥

(४) शास्त्राचार्योपदेशशमदमादिसहकृतमनस एवात्मापरोक्षज्ञानजनकत्वम् निर्विचिकित्सपरोक्षज्ञानजनकत्वन्तु श्रवणस्यैवेत्यत्रैव नियमविधिरिति केचित् ॥

तथा च पूर्वमते शाब्दसाक्षात्कारकरणशब्दसहकारितया मननानिदिध्यासनयोर्विधिः । अस्मिन्मते ब्रह्मसाक्षात्कारस्य मानसत्वप्रतिपादनेन तत्करणमनस्सहकारितयैव तयोर्विधिरिति पूर्वोत्तरयोर्विवेकः ॥

(५) षड्जादिसाक्षात्कारे श्रोत्रेन्द्रियमेव करणम् । गान्धर्वशास्त्रविचारस्तु षड्जादिष्वारोपितेतरेतराविवेकनिवृत्तावुपयुज्यते इति षड्जादिसाक्षात्कारे श्रोत्रस्य सहकारी भवति यथा , तथा शमादिसंस्कृतम्मनः आत्मसाक्षात्कारे करणम् । वेदान्तश्रवणन्त्वात्मन्यारोपितदेहादितादात्म्यनिवृत्तावुपयुज्यत इति मनःसहकारित्वेन कृप्तत्वान्नापूर्वविधिः, किन्तु श्रवणेनियमविधिरप्यपरोक्षज्ञानार्थत्वेनैव। तादर्थ्यञ्चास्यापरोक्षज्ञानकरणमनःसहकारित्वमेवेत्याहुरपरे ॥

(६) पूर्वोक्तपक्षेषु परोक्षापरोक्षज्ञानोद्देशेन श्रवणविधाने तस्याप्रमाणत्वेनज्ञानाजनकत्वात्, तज्जन्यत्वे च ज्ञानस्य तत्प्रामाण्यस्य परतस्त्वापत्तेश्च,न ज्ञानं श्रवणफलम्-विचारजन्यतात्पर्यनिर्णयविशिष्टशाब्दज्ञानरूपश्रवणे विध्यनुपपत्तेश्चेत्यरुच्या विचारस्योहापोहात्मकमानसक्रियारूपत्व-

मभ्युपेत्य वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयद्वारा तात्पर्यभ्रमादि-पुरुषापराधनिरासोद्देशेनैव विचारात्मकश्रवणे नियमविधिरिति सङ्क्षेप-शारीरकमतानुसारिणः प्राहुः ॥

(७) यथा औषधज्ञानाय तादर्थ्येन चरकादिश्रवणे प्रवृत्तस्य मध्ये मध्ये विषयासक्त्या व्यापारान्तरे प्रवृत्तिः, तथा आत्मसाक्षात्काराय वे-दान्तश्रवणे प्रवृत्तस्यापि प्राचीनदुर्वासनया बहिः प्रवृत्तिः स्यादिति तन्नि-षेधार्थं श्रोतव्य इति परिसङ्ख्याविधिरिति वार्तिकमतानुसारिणः प्राहुः ॥

(८) यथा आत्मा ब्रह्मस्वभावः चिद्रूपत्वात् ब्रह्मवत्, बुद्ध्यादिः कल्पितः दृश्यत्वात् शुक्तिरजतादिवदित्याद्यनुमानरूपस्य मननस्य; अहञ्चिदात्मा ब्रह्मस्वभाव एव, ब्रह्म च चिदेकरसप्रत्यगात्मस्वभावमेवेति तत्त्वंपदलक्ष्यार्थनिर्णयरूपस्य निदिध्यासनस्य च, ज्ञानरूपत्वम्, एवं वेदान्तवाक्यानामुपक्रमादिषड्विधतात्पर्यलिङ्गैरद्वितीये ब्रह्मणि तात्पर्य-निर्णयात्मकस्य श्रवणस्यापि ज्ञानरूपत्वमेवैष्टव्यम्, न तात्पर्यविचाररू-पत्वमिति न कोपि विधिस्तत्र प्रवर्तते—प्रमाणफलत्वात् । तर्हि विधिलिङ्गानान्तव्यप्रत्ययानाङ्का गतिरितिचेत्—"विष्णुरूपांशु यष्टव्य" इत्यादिविधिच्छायार्थवादस्येव स्तुतिमुखेनात्यन्तरुच्युत्पादकत्वमात्रेण विधित्वव्यवहारस्तत्रेत्यदोषः । श्रवणानुष्ठापकविध्यभावे कथं पुरुष-प्रवृत्तिस्तत्रेति चेन्न । यथा कर्मकाण्डविचारः—'कर्मवाक्यविचारः कर्तव्य' इति पृथग्विध्यभावेपि स्वाध्यायविधिनैव सिध्यति, एवं वेदा-न्तश्रवणमपि वेदार्थविचारत्वाविशेषात्तद्बलादेव सिध्यतीति न पृथ-क्कृच्छ्रोतव्यवाक्यविध्यपेक्षेत्याचार्यवाचस्पतिमतानुगाः प्राहः ॥

॥ (२) ॥

(१) जगज्जन्मादिष्वेकैकमप्यनन्यगामित्वात्प्रत्येकमेव ब्रह्मलक्षणमिति द्वितीयसूत्रार्थ इति कौमुदीकाराः प्राहुः ॥

(२) इदञ्जन्मादिकमेकमेवसल्लक्षणम्भूत्वाऽभिन्ननिमित्तोपादानत्वे पर्यवस्यदद्वितीयम्ब्रह्मातद्व्यावृत्तिद्वारा लक्षणया ज्ञापयति, न तु प्रत्येकलँक्षणं सदित्यन्ये प्राहुः ॥

॥ (३) ॥

ननु अभिन्ननिमित्तोपादनम्ब्रह्म किं ? शुद्धरूपम् उत ईश्वररूपम्, अथवा जीवरूपं वेति प्रश्ने ।

(१) सङ्क्षेपशारीरकमतानुसारिणस्त्वाहुः—जन्मादिसूत्रे वाक्यार्थभूतशुद्धब्रह्मण एव प्राधान्येन लक्षणीयत्वात् तस्यैव जगदुपादानत्वमिति ॥

(२) मायोपाधिनिरूपितबिम्बत्वविशिष्टं सर्वज्ञत्वादिगुणकमीश्ररूपम्ब्रह्मचैतन्यमेवोपादानमिति विवरणानुसारिणः प्राहुः ॥

(३) मायापरिणामवियदादिप्रपञ्चस्येश्वर एवोपादानम्, अन्तःकरणादेस्तुजीवाविद्यापरिणामसूक्ष्मभूतानामीश्वरमायापरिणाममहाभूतोपष्टब्धानामुपादानतया तत्र प्रविष्टत्वादेव जीवेशावुभावप्युपादानमिति मायाविद्याभेदवादिनः प्राहुः ॥

(४) मायापरिणामवियदादिप्रपञ्चस्येश्वर उपादानम् । अविद्यापरिणामान्तःकरणादेस्तु जीव एवेति मायाविद्याविभेदवादिष्वेकदेशिनआहुः॥

(५)मायाविद्याऽभेदवादिष्वपि केचिद्वियदादिप्रपञ्चस्येश्वर उपादानम् अन्तःकरणादीनान्तु जीवतादात्म्यप्रतीतेर्जीव एवोपादानमिति प्राहुः ॥

(६) अन्येतु कृत्स्नस्य व्यावहारिकप्रपञ्चस्य ब्रह्मैवोपादानम्—जीवस्तु स्वप्नादिप्रातिभासिकप्रपंचस्योपादानमित्याहुः ॥

(७) केचित्तु अत्यन्तोत्तमाधिकारिण उद्दिश्य कृत्स्नस्य प्रपञ्चस्य प्रातिभासिकत्वमङ्गीकृत्य स्वप्नप्रपञ्चस्येव जीव एव सेश्वरवियदादिनिखिलदृश्यप्रपञ्चस्य कारणमित्याहुः ॥

॥ (४) ॥

ननु चैतन्यस्य जगदुपादानत्वे "मायान्तु प्रकृतिं विद्यादि" त्यादिश्रुतेः का गतिरिति चेत् ॥

(१) अत्र पदार्थतत्वनिर्णयकारास्त्वाहुः ब्रह्ममाया चेत्युभयंविवर्तत्वेन परिणामित्वेन चोपादानमित्याहुः ॥ उपादानत्वञ्च स्वात्मनि कार्यजनिहेतुत्वम् । तच्च द्विविधम्—परिणामि—विवर्तञ्चेति ॥

वस्तुनस्तत्समसत्ताकोन्यथाभावः परिणामः, तदसमसत्ताको विवर्तः इति वा ॥ कारणसलक्षणोऽन्यथाभावः परिणामः-तद्विलक्षणो विवर्त इति वा ॥ कारणाभिन्नङ्कार्यम्परिणामः-तदभेदं विनैव तद्व्यतिरेकेण दुर्वचङ्कार्यं विवर्त इति वा ॥ तथा च ब्रह्मणः पारमार्थिकी सत्ता--घटादिप्रपञ्चस्य व्यावहारिकी—शुक्तिरजतादेः प्रातिभासिकी चेति सत्तात्रैविध्याङ्गीकर्तृमतेन प्रथमलक्षणम् । ब्रह्मणि घटादौ शुक्तिरजतादौ च सर्वत्र ब्रह्मस्वरूपभूतैकैव सत्तेतिमतेन द्वितीयम् । सर्वसाधारणन्तृतीयमिति भेदः ॥

(२) केचित्तु मायाब्रह्मरूपपरिणामविवर्तोपादानद्वयसाधारणं स्वाभिन्नकार्यजनकत्वमेकं लक्षणमाहुः ॥

(३) सङ्क्षेपशारीरककृतस्तु--कूटस्थस्य ब्रह्मणः स्वतः कारणत्वानुपपत्तेर्मायाद्वारा कारणत्वम् । तथा च कूटस्थचैतन्यरूपे ब्रह्मणि अध्यस्तां माया ब्रह्मणो जगत्प्रकृतित्वं सम्पाद्य स्वयमपि सहकारिकारणभावमुपेयत घटादौ मृद इव तद्वतश्लक्ष्णत्वादेरपि इत्याहुः ॥

(४) वाचस्पतिमिश्रास्तु "जीवाश्रितमायाविषयीकृतम्ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया जगदुपादानम् ॥ पूर्वमते इव मायायाः सहकारित्वेपि न कार्यप्रवेशोस्तीति द्वारकारणत्वनिषेधोऽत्र बोध्यत इत्याहुः ॥

(५) सिद्धान्तमुक्तावलीकृतस्तु--शक्तयात्मकमायैव मुख्यमुपादानम् "मायान्तु प्रकृतिं विद्यादि" ति श्रुतेः । न ब्रह्म 'तदेतद्ब्रह्मापूर्वमनपरं न तस्य कार्यं करणञ्चे" त्यादिश्रुतेः। तस्यं तु जगदुपादानमायाधिष्ठानत्वेनौपचारिकमुपादानत्वमित्याहुः ॥

॥ (५) ॥

अथ कोहीश्वरः? कश्च जीव इति प्रश्ने । उत्तरम्—

(१) उक्तम् प्रकटार्थविवरणे—मायायाश्चित्प्रतिबिम्बः ईश्वरः । अविद्यायाश्चित्प्रतिबिम्बो जीवः । अत्रच मायाया आवरणविक्षेपशक्तिमद्भाग एवाविद्येति ॥

(२) तत्त्वविवेके तु शुद्धसत्वप्रधाना मूलप्रकृतिः माया । मलिनसत्वप्रधानाऽविद्येति मायाऽविद्याभेदम्परिकल्प्य मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बो जीव इत्युक्तम् ॥

(३) क्वचिदुपपादितम्– मूलप्रकृतिरेव विक्षेपशक्तिप्राधान्येन माया–ईश्वरोपाधिर्भवति । आवरणशक्तिप्राधान्येन अविद्या जीवोपाधिरिति च जीवेश्वरविभाग इति ॥

(४) सङ्क्षेपशारीरके तु--अविद्यायाञ्चित्प्रतिबिम्बः ईश्वरः । अन्तःकरणे चित्प्रतिबिम्बो जीव इति कथितम् ॥

(५) चित्रदीपे "कूटस्थो ब्रह्म जीवेशावित्येवञ्चिच्चतुर्विधा । घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा" इति चिच्चातुर्विध्यम्परिकल्प्य ब्रह्माश्रितसकलप्राणिधीवासनोपरक्ताज्ञाने प्रतिबिम्बितश्चैतन्यमीश्वरः । स एव सौषुप्तानन्दमयः । अन्तःकरणे प्रतिबिम्बितश्चैतन्यञ्जीव इति जीवेशविभाग उक्तः ॥

(६) जीवेश्वरयोर्बिम्बप्रतिबिम्बत्वपक्षे तयोर्भेदमात्रं कल्पितं स्वतस्तयोरभेद एवेत्येकेषाम्मतम् ॥

(७) प्रतिबिम्बस्वरूपमात्रङ्कल्पितमेवेति केषाञ्चिन्मतम् । अत्र, अहमिति प्रकाशमानो जीवोऽज्ञातासङ्गानन्दादिरूपविशेषांशे स्थूलसूक्ष्मदेहद्वयाधिष्ठानचैतन्ये कूटस्थे कल्पितः शुक्तौ रूप्यवत् ॥ तर्हि कल्पितस्याहंब्रह्मास्मीत्यविनाशिब्रह्माभेदरूपा मुक्तिरहंब्रह्मास्मीतिवाक्येन कथं सिध्येत् इति चेत्—एवं नह्यभेदो वाक्यस्यार्थः, किन्तु यः स्थाणुः स पुमानित्यत्र स्थाण्वारोपाधिष्ठानभूते पुरुषे वस्तुतः स्थाणुतादात्म्याभावरूपा बाधा वाक्यार्थः यथा । तथा जीवारोपाधिष्ठानभूते कूटस्थे जीवतादात्म्याभावरूपा बाधैवाहम्ब्रह्मास्मीति वाक्यस्यार्थः । तथा चारोपिताहमर्थनिवृत्तौ वास्तवकूटस्थचैतन्यावस्थानरूपा मुक्तिर्न विरुध्यत इति॥

(८) पञ्चदश्याम्ब्रह्मानन्दे तु सुषुप्तौ विलीनावस्थान्तःकरणोपाधिको जीवः आनन्दमयः । तस्य वस्तुत ईश्वरत्वाभावेपि अध्यात्माधिदैवताभेदविवक्षया ईश्वरत्वमपि सङ्गच्छते । घनीभूतान्तःकरणोपाधिको विज्ञानमय इति चोक्तम् ॥

(९) दृग्दृश्यविवेके तु पूर्वोक्तचिच्चातुर्विध्यपक्षं विहाय कूटस्थजीवावेकीकृत्य 'जीव ईशो विशुद्धाचि'दितिवृद्धवचनसिद्धं चित्रैविध्यमवलम्ब्य पारमार्थिकव्यावहारिकप्रातिभासिकभेदेन जीवत्रैविध्यमुक्तम्। तत्र देहद्वयावच्छिन्नकूटस्थचैतन्यरूप आत्मा पारमार्थिकजीवः। तस्मिन् व्यावहारिकान्तःकरणप्रतिबिम्बरूपो यावद्व्यवहारमनुवर्तमानो व्यावहारिकजीवः कल्प्यते। तस्मिन् स्वप्नकाले वासनामयप्रातिभासिकरथादिवद्वासनामयान्तःकरणप्रतिबिम्बरूपः प्रातिभासिकजीवः कल्प्यते जलाशयतरङ्गबुद्बुदानामुपर्युपरिकल्पनावदिति ॥

(१०) विवरणानुसारिणस्तु अविद्याप्रतिबिम्बो—जीवः,तद्बिम्बभूत ईश्वरः, तदुभयानुगतं शुद्धचैतन्यं चेति ॥

(११) अन्तःकरण वच्छिन्नो जीवः, तदनवच्छिन्नः किन्त्वविद्यावच्छिन्न ईश्वर इति वाचस्पतिमतानुसारिणः प्राहुः ॥

(१२) जीवो हि न प्रतिबिम्बो नाप्यवच्छिन्नः किन्त्वविकृतम्ब्रह्मैव सच्चिदानन्दादिलक्षणं स्वाविद्यया संसरतीव. स्वविद्यया मुच्यत इव च कौन्तेयवदिति वार्तिकानुसारिणः आहुः ॥

॥ (६) ॥

अथायञ्जीव एकः उतानेक इति चेत्—

(१) अत्रतु स्वप्नवज्जागरेप्येक एव जीवः, तेनैकमेव शरीरं

सजीवम्, अन्यानि तु निर्जीवानि,तदज्ञानकल्पितमेव सेश्वरं सर्वज्ञगत्॥ बद्धमुक्तगुरुशिष्यशास्त्रादिव्यवहारः स्वाप्नव्यवहारवत् विद्यया यावदविद्यानिवृत्ति निर्बाधमनुवर्तते,स्वप्नदृष्टान्तेनैवात्र समुल्लसत्समस्तसंशयनिरासः कर्तव्य इति वार्तिकमतानुयायिन आहुः ॥

(२) अन्ये तु—हिरण्यगर्भ एवैको ब्रह्मप्रतिबिम्बो मुख्यजीवः, अन्ये तत्प्रतिबिम्बभूता जीवाभासा इति ॥

(३) अपरे तु—अविद्यायाम्ब्रह्मप्रतिबिम्ब एको जीवः, सर्वे शरीरं तुल्यतया स्वभोगाद्यर्थमधितिष्ठतीति॥

(४) केचित्तु—अनेकान्तःकरणानाञ्जीवोपाधित्वाभ्युपगमेन ब्रह्मैव स्वाविद्यया नानान्तःकरणरूपेण परिणतया नानाजीवभावम्प्राप्य संसरति, स्वविद्यया क्रमेण मुच्यत इति ज्ञानाज्ञानप्रयुक्तबन्धमुक्त्यादिव्यवस्थाअनेकजीववादम्प्रतिपद्यन्ते ॥

॥ तेषु केचित्—ब्रह्माश्रयविषयकमेकमेवाज्ञानं सांशमंशान्तरैर्बद्धेष्वनुवर्तते; तस्य तस्य ज्ञानेन तत्तदन्तःकरणादिपरिणामिनो मूलाज्ञानांशस्य निवृत्तौ मुक्तेंऽशेन निवर्तत इत्याहुः ॥

॥ अपरेतु—मनोनियम्योऽविद्यासंसर्गलक्षणो बन्धो यावन्मनः संसारिषु यथावदवतिष्ठते । तत्त्वज्ञानेन मनोनाशेन संसृज्यते प्रतियोगिसंसर्गेऽत्यन्ताभाववदिति ॥

॥ केचित्तु—शुद्धचैतन्यविषयकजीवाश्रयमेकमेवाज्ञानं यथा जातिर्व्यक्तिमात्राश्रयापि नष्टां व्यक्तिञ्जहाति एवं सर्वज्ञीववर्त्यपि सत् तत्त्वज्ञन्त्यजतीत्याहुः ॥

॥ इतरेतु—प्रतिजीवमविद्याभेदमुपगम्य तदनुवृत्तिनिवृत्तिभ्याम्बन्धमुक्तिव्यवस्थां समर्थयंते ॥

॥ (७) ॥

ननुकस्याविद्याकृतःप्रपञ्चइति चेत्—

(१) अत्र च केचित्सर्वाविद्यापरिणाम एक एव प्रपञ्चो बहुतन्त्वारब्धपटवदास्ते। एकमुक्तौ तदविद्यानाशे एकतन्तुनाशे पटनाशवत् तत्प्रपञ्चनाशेपि इतरतन्त्वारब्धपटवदितराविद्याकृतः प्रपञ्चोऽस्त्येवेत्याहुः ॥

(२) अन्येतु—तत्तदविद्याकृतो वियदादिप्रपञ्चः प्रतिपुरुषं शुक्तिरजतादिवत् तत्तदपेक्षाबुद्धिजन्यद्वित्वादिवच्च भिन्न एवायत्त्वयाऽनुभूयते रजतादि तदेव मयापीति प्रत्यभिज्ञानप्रत्यक्षन्तु भ्रममात्रमित्याहुः ॥

(३) केचित्तु—जीवाश्रिताविद्यासङ्घाद्भिन्ना ईश्वराश्रिता मायैव वियदादिप्रपञ्चपरिणाम्युपादानम्—जीवाविद्यानान्तु आवरणे इव प्रातिभासिकविक्षेपेप्युपादानत्वस्वीकारान्न वैयर्थ्यमिति च प्राहुः ॥

॥ (८) ॥

अथ ब्रह्मणः कर्तृत्वं कीदृशमिह लक्षणे विवक्षितम् ?

(१) अत्र केचिदाहुः—"तदैक्षत—" "सोऽकामयत" "तदात्मानं स्वयमकुरुत" इत्यादिश्रुतेः न्यायाच्च कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वङ्कर्तृत्वमिति ॥

(२) अन्येतु—कार्यमात्रे कर्तृत्वलक्षणानुगमाय ज्ञानादित्रितयरूपकर्तृत्वसाधनार्थं इच्छाकृत्यंतरापेक्षायामनवस्थासंभवात् कार्यानुकूल-

ज्ञानमेव ब्रह्मणः कर्तृत्वम् । नित्यज्ञानस्वरूपस्य ब्रह्मणस्तादृशज्ञानवत्त्व-मौपाधिकमिति न ज्ञानेप्येष प्रसङ्ग इति ॥

(३) अपरेतु—कार्यानुकूलज्ञानवत्त्वमात्रं कर्तृत्वमित्युक्तौ अधि-ष्ठानज्ञानवत्त्वेन जीवस्यापि शुक्तिरजतादिभ्रमे कर्तृत्वप्रसङ्गात् तद्वारणाय कार्यानुकूलस्रष्टव्यालोचनारूपज्ञानवत्त्वङ्कर्तृत्वं वक्तव्यमित्याहुः ॥

॥ (९) ॥

अथ कथं ब्रह्मणः सर्वज्ञत्वम्—जीववत् प्रमाणसिद्धवृत्तिज्ञाना-श्रयत्वरूपज्ञातृत्वप्रयोजकान्तःकरणाभावादिति चेत् ॥

(१) अत्राहुर्भारतीतीर्थाः—ईश्वरस्य सर्ववस्तुविषयसकलप्राणि-धीवासनोपरक्ताज्ञानोपाधिकत्वेन सर्वविषयवासनासाक्षितया सर्वज्ञत्व-मिति ॥

(२) प्रकटार्थकारास्तु—अन्तःकरणवृत्तियोगाज्जीवस्य ज्ञातृत्व-वत् चित्प्रतिबिम्बग्राहकसात्विकमायावृत्त्या त्रैकालिकसर्वपदार्थविषय-कापरोक्षज्ञानवत्त्वेन सर्वज्ञत्वमित्याहुः ॥

(३) तत्त्वशुद्धिकारास्त्वाहुः—ब्रह्मणो विद्यमाननिखिलप्रपञ्चसा-क्षात्कारवत्त्वात्, तज्जन्यसंस्कारजस्मरणेनातीतसकलवस्त्ववभाससिद्धेः । मायायाः सृज्यमाननिखिलपदार्थस्फुरणरूपेण परिणममानत्वेन तत्सा-क्षितया तदुपाधिकस्य ब्रह्मणोऽनागतवस्तुविज्ञानोपपत्तेश्च सर्वज्ञत्व-मिति ॥

(४) कौमुदीकृतस्तु—स्वरूपज्ञानेनैव ब्रह्मणः स्वसंसृष्टसर्वावभा-सकत्वात् अतीतानागतयोश्चाविद्यायाम्भित्तौ विमृष्टानुन्मीलितचित्रव-

(द्वासनात्मना)त्संस्कारात्मना सत्वेन तत्संसर्गस्याप्युपपत्तेः सर्वज्ञत्वमिति वदन्ति ॥

(५) वाचस्पतिमिश्रास्तु—यद्यपि ब्रह्मणः स्वरूपचैतन्येनैव स्वसंसृष्टसर्वावभासकत्वरूपं सर्वज्ञत्वमस्तु, तथापि ज्ञानस्य स्वतोऽकार्यत्वेपि दृश्यावच्छिन्नरूपेण कार्यत्वात् तदाश्रयत्वेन ब्रह्मणो न ज्ञानजनिकर्तृत्वबोधक"यःसर्वज्ञ"इत्यादिश्रुतिविरोध इति ॥

॥ (१०) ॥

अथ ईश्वरवज्जीवोपि वृत्तिविना स्वरूपेणैव विषयानवभासयत्विति चेत्—

(१) अत्रोक्तं विवरणे—सर्वोपादानत्वाद्ब्रह्मचैतन्यस्य तेन स्वारोपितं सर्वमवभास्यते—न जीवचैतन्येन, तस्याविद्योपाधिकतया व्यापकत्वेपि अनुपादानत्वेन सम्बन्धाभावात् । यथा गोत्वादिसामान्यं सर्वगतमपि सास्नादिमद्व्यक्तावेव संसृज्यते नाश्वादिव्यक्तौ, तथा सर्वगतोपि जीवः अन्तःकरणमात्रेण संसृज्यते न विषयैः । तथा च इंद्रियद्वारा बहिरागत्य विषयदेशं व्याप्नुवदन्तःकरणवृत्तिमारुह्य जीवो विषयैः सम्बध्यते तदर्था वृत्तिरिति ॥

(२) अथवा—अन्तःकरणोपाधिकतया परिच्छिन्नो जीवः संसर्गाभावाद्विषयान्नावभासयति । वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्येनाभेदाभिव्यक्तौ तु विषयम्प्रकाशयति । अतोऽभेदाभिव्यक्त्यर्था वृत्तिरिति ॥

(३) अथवा—जीवःसर्वगतोपि विषयैः संसृष्टएवाविद्यावृतत्वा-

द्विषयान्नावभासयति । वृत्त्युपरागादावरणनिवृत्तौ तत्रैव प्रकाशमानः सन्विषयम्प्रकाशयति अत आवरणाभिभवार्था वृत्तिरिति ॥

प्रथमपक्षे—अनावृतो जीवो विषयासंसृष्टः; तृतीयपक्षे—विषयसंसृष्टो जीव आवृत इति भेदः ॥

॥ (११) ॥

प्रथमपक्षे किंलक्षणको विषयोपराग इति चेत्—

(१) अत्राहुः केचित्—विषयचैतन्ययोर्विषयविषयिभावसम्बन्ध एव विषयोपराग इति ॥

(२) अन्येतु—जीवतादात्म्यापन्नमनोवृत्तेर्विषयसंयोगे तद्द्वारा जीवस्यापि विषयेण संयुक्तवृत्तितादात्म्यलक्षणः परम्परासम्बन्ध एव स इति॥

(३) अपरेतु—साक्षात्प्रमातृसम्बन्धे सत्येव सुखादेरापरोक्ष्यदर्शनात्, प्रमात्रवच्छेदिकायाः वृत्तेर्बाह्यघटादिविषयैः संयोगे सति वृत्त्यवच्छेदेन तदुपादानस्य प्रमातुः संयोगजसंयोगोऽस्तीति स एव स इति॥

(४) एकदेशिनस्तु—अन्तःकरणोपहितो जीवो विषयावभासकः तस्यान्तःकरणवृत्त्या विषयाधिष्ठानब्रह्मचैतन्यैक्यद्वारा विषयैस्तादात्म्यमेव सम्बन्ध इति ॥

॥ (१२) ॥

द्वितीयपक्षे—केयमभेदाभिव्यक्तिरिति चेत्—

(१) अत्राहुः—केचित्—तटाककेदारसलिलयोः कुल्याद्वारेव वृत्तिद्वारा अन्तःकरणावच्छिन्नजीवचैतन्यस्य विषयावच्छिन्नब्रह्मचैतन्येनैक्यमभेदाभिव्यक्तिरिति ॥

(२) अन्येतु—विषयावच्छिन्नब्रह्मचैतन्यस्य वृत्तौ यः प्रतिबिम्बो विषयप्रकाशकः तस्य अन्तःकरणावच्छिन्नजीवचैतन्येनैकत्वमभेदाभिव्यक्तिरिति ॥

(३) अपरेतु—साक्षाद्विषयावभासकविषयावच्छिन्नबिंबभूतब्रह्मचैतन्यस्यैवान्तःकरणप्रतिबिम्बत्वविशिष्टजीवचैतन्येन सह बिम्बत्वप्रतिबिम्बत्वोपलक्षितशुद्धचैतन्यात्मना एकीभावोऽभेदाभिव्यक्तिरिति ॥

॥ (१३) ॥

तृतीयपक्षे—को नामावरणाभिभवः इति चेत् ॥

(१) अत्राहुः केचित्—चैतन्यमात्रावारकमूलाज्ञानस्य विषयावच्छिन्नप्रदेशे ज्ञानेनैकांशनाशो वा-कटवत्संवेष्टनं वा-भीतभटवदपसरणं चाऽभिभवः इति ॥

(२) अन्येतु—चैतन्यमात्रावारकाज्ञानस्य तत्तद्विषयाकारवृत्तिसंसृष्टविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यमेवाभिभवः इति ॥

(३) अपरेतु—चैतन्यमात्रावारकमूलाज्ञानस्यावस्थाभेदरूपं विषयावच्छिन्नचैतन्यावारकमज्ञानान्तरमस्ति तन्नाश एवाभिभव इति ॥

॥ (१४) ॥

नन्ववस्थाऽज्ञानानि किमनादीनि उत सादीनीति चेत्—

(१) अत्राहुः— केचित्—इमान्यवस्थारूपाणि घटाद्यज्ञानानि अनादीनि अज्ञानत्वाविशेषात् मूलाज्ञानवदिति ॥

(२) अन्येतु—अवस्थाऽज्ञानानि आदिमन्ति अवस्थाज्ञानत्वात् स्वप्नकारणीभूतनिद्रावत् सुषुप्तिवच्चेति ॥

॥ (१५) ॥

नन्ववस्थाज्ञानानामनादित्वपक्षे प्राथमिकज्ञानेनकमेवाज्ञानन्नश्यति नेतराणीत्यत्र विनिगमकाभावात्सर्वाज्ञाननाशो वक्तव्यःअन्यथा एकावरणनाशेप्यावरणान्तराणां सत्त्वाद्विषयप्रकाशानुपपत्तेरिति चेत्—

(१) अत्राहुः— केचित्–यथा न्यायमते यावन्ति घटज्ञानानि तावन्तो घटज्ञानप्रागभावाः सन्ति, तत्र प्रथमज्ञानेनैक एव ज्ञानप्रागभावो निवर्तते, अन्ये यथापूर्वं सन्त्येव,तेषां सत्वेपि विषयप्रकाशश्च तैरुपेयते । एवं एकज्ञानोदये एकमेवाज्ञानं निवर्तते, अज्ञानान्तरेषु सत्स्वपि विषयप्रकाशश्च भवतीति ॥

(२) अन्येतु—अवस्थाऽज्ञानानां मध्ये यदा यदाज्ञानमावृणोति तदा तज्ज्ञानेन तदज्ञानमेव निवर्तते, नहि सर्वाज्ञानं सर्वदा आवृणोति निष्फलत्वात्, किन्तु प्रथमज्ञाने नष्टेऽज्ञानान्तरमावृणोतीति ॥

(३) इतरेतु—सन्ततमेव समस्ताज्ञानानामावारकत्वस्वाभाव्येपि, यथा कस्यचिच्छिरसि निपतन्नशनिरितरानपि तत्रत्यानपसारयति, यथावा सन्निपातरूपैकदोषनिवर्तकमौषधन्दोषान्तराण्यपि दूरीकरोति, तथा एकाज्ञानं नाशयज्ज्ञानमज्ञानान्तराण्यपि तिरस्करोतीति ॥

॥ (१६) ॥

ननु धारावाहिकस्थले प्रथमज्ञानेनैवाज्ञानमात्रस्याभिभवसम्भवे ज्ञानमात्रमज्ञाननिवर्तकमिति न्यायात् द्वितीयादिज्ञानस्य विफलतेति चेत्—

(१) अत्राहुः केचित्—यस्मिन् सत्यग्रिमक्षणे यस्य सत्वं यस्मि-

न्नसति यस्यासत्वं तत् तज्जन्यमिति साध्यलक्षणविशेषानुरोधेन प्रथमज्ञानात्तिरस्कृतमज्ञानं तज्ज्ञानोपरमसमये उत्पन्नद्वितीयादिज्ञानेन प्रदीपोपरमसमये उत्पन्नप्रदीपान्तरेण तम इव तिरस्कृतं तिष्ठतीति न द्वितीयादिज्ञानानां विफलतेति ॥

(२) न्यायचन्द्रिकाकृतस्तु—एकेन ज्ञानेनैकस्याज्ञानस्य नाश एव, न त्वज्ञानान्तराणामपसरणम् । अज्ञानानि स्वस्वकालोपलक्षित-विषयावारकाणि, ज्ञानानि च स्वस्वकालोपलक्षितविषयावारकाज्ञाननाश-कानीति धारावाहिकस्थले द्वितीयादिज्ञानानां सफलतेति ॥

(३) अपरे तु—प्रथमज्ञानेन घटादिविषयकमज्ञानमात्रं निवर्तते द्वितीयादिज्ञानैस्तु देशकालादिविशिष्टाज्ञानानि निवर्तन्त इति द्वितीयादिज्ञानसाफल्यमिति ॥

(४) अथवा धारावाहिकस्थले प्रथमोत्पन्नमेकमेव ज्ञानं दीर्घकालं नैरन्तर्येणावतिष्ठते वृत्तिभेदानङ्गीकारादिति अतो न तत्र निष्फलत्वशङ्केति ॥

(५) यद्वा—न्यायमत इव क्षणिकत्वेपि ज्ञानानां (भेदाङ्गीकारेपि) द्वितीयादिज्ञानानामधिगतार्थविषयकत्वेनाप्रामाण्यादावरणानाशकत्वेपि ज्ञानमज्ञाननिवर्तकमिति नियमाबाधः, प्रमात्मकज्ञानस्यैव तथात्वाभ्युपगमादिति द्वितीयादिज्ञानानां सफलतेति ॥

॥ (१७) ॥

ननु परोक्षवृत्तेर्बहिर्विषयदेशागमनेनाज्ञाननिवर्तकत्वान्नियमभङ्ग इति चेत्—

(१) अत्राहुः केचित्—विषयावारकमज्ञानं द्विविधम्, एकं विषयाश्रितं अपरं पुरुषाश्रितं चेति। तत्र परोक्षवृत्तेर्विषयगताज्ञाननिवर्तकत्वेपि पुरुषगताज्ञाननिवर्तकत्वमस्ति । अपरोक्षवृत्तेस्तु तदुभयनिवर्तकत्वमस्तीति न नियमभङ्ग इति ॥

(२) अन्ये तु—परोक्षवृत्त्या यथाऽज्ञाननिवृत्तिरनुभूयते एवं सत्यपि परोक्षज्ञाने दूरस्थवृक्षे विपरीतपरिमाणोत्पत्तिरङ्गीक्रियते । तथाचानुभवद्वयानुरोधेन पुरुषाश्रितस्यैवाज्ञानस्य विषयावारकस्यैकदेशः परोक्षज्ञानेन निवर्तते एकदेशान्तरमनुवर्तत इति, एकस्यैव पुरुषगताज्ञानस्य (द्वैविध्यं कल्प्यते) अवस्थाद्वयं कल्प्यते, न त्वज्ञानद्वैविध्यमभ्युपगम्यते गौरवादिति ॥

(३) अपरे तु—घटादेर्मृदादिपरिणामत्ववच्छुक्तिरजतादेरपि परिणामत्वमभ्युपेयम्, तत्परिणामि चान्वयव्यतिरेकाभ्यामज्ञानमेव । तच्चाज्ञानं विषयगतचैतन्यमेव न प्रमातृगतम्, तस्य पुरुषं विहाय बहिर्निर्गमनासम्भवात् । अक्रियत्वेन प्रभान्यायात्पुरुषं सम्बध्यापि बहिर्निर्गत्य परिणामायोगाच्च विषयगतमेवाज्ञानं तदावारकम् । तस्यापरोक्षज्ञानेनैवनिवृत्तिः । प्रमाणवृत्तीनामज्ञाननिवर्तकत्वनियमस्य अप्रतिबद्धापरोक्षज्ञानमज्ञाननिवर्तकमित्यभ्युपगमान्न हानिरिति ॥

ननु, अविद्याहङ्कारसुखदुःखादितद्धर्माणां साक्षिभास्यानामज्ञानाभावेन तज्ज्ञानस्यावरणानिवर्तकत्वेन अप्रतिबद्धापरोक्षज्ञानमज्ञाननिवर्तकमिति नियमभङ्गस्तदवस्थ एवेति चेत्—

अत्राहुः केचित्–अविद्यासुखदुःखादितद्धर्म्यहङ्कारादीनां साक्षिरूपप्रत्यक्षविषयत्वेन वृत्तिरूपापरोक्षज्ञानस्यैवाज्ञाननिवर्तकत्वाभ्युपगमान्न नियमभङ्ग इति ॥

॥ (१८) ॥

अथ अहमर्थजीवातिरेकेण साक्षी नाम क इति चेत्–

(१) अत्रोक्तं कूटस्थदीपे–देहद्वयाधिष्ठानं यच्चैतन्यं शुद्धजीवेश्वरत्वाद्यस्पृष्टं स स्वावच्छेदकदेहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते । साक्षिसद्भावे "साक्षी चेता केवलो निर्गुणश्च" इति लक्षणपरा श्रुतिः, साक्षिणो जीवाद्भिन्नत्वे "तयोरन्यः पिप्पलं स्वाद्वत्त्यन श्नन्नन्यो अभिचाकशीति" इति श्रुतिश्च मानमिति ॥

नाटकदीपेपि—नृत्तशालास्थदीपदृष्टान्तेन जीवाद्विविच्य दर्शितो यः स चिदाभासविशिष्टाहङ्काररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति ॥

कूटस्थदीपे–देहद्वयाभिमानिजीवभ्रमाधिष्ठानभूतकूटस्थचैतन्यं जीवादेरवभासकं साक्षीत्युक्तम् ॥

नाटकदीपे च–चिदाभासविशिष्टाहङ्कारं जीवं कल्पयित्वा तदवभासकं सुषुप्तिसाधारणं चैतन्यं साक्षीत्युक्तमिति ॥

(२) तत्त्वप्रदीपिकायां–अन्तःकरणगतचित्प्रतिबिम्बात्मकानां सर्वेषां जीवानां प्रत्यग्भूतमधिष्ठानतयाऽऽन्तरं स्वरूपं जीवेश्वरत्वजगत्त्वादिरहितं शुद्धं ब्रह्मैव जीवाद्भेदेन तत्तज्जीवाधिष्ठानत्वादेव तत्तज्जीवतादात्म्यापत्त्या प्रतिशरीरं प्राप्तभेदं सत्साक्षीत्युच्यते ॥

(३) कौमुद्यां तु—"एको देव" इति देवत्वादिश्रुत्यनुरोधेनेश्वरस्यैव कश्चिद्रूपभेदः कारणत्वादिधर्मानास्पदोऽपरोक्षः जाग्रदादौ जीवप्रवृत्ति-निवृत्त्योरनुमन्ता स्वयमुदासीनः, सुषुप्त्यादौ च सर्वकार्यकरणोपरमे जीवाश्रयाज्ञानमात्राभिव्यञ्जकः प्राज्ञशब्दवाच्यः साक्षीत्युक्तमिति ॥

(४) तत्वशुद्धिकारा अपि प्रकारान्तरेणैवमेवाहुः—साक्षी तु स्वतः ईश्वरोपि सन् स्वारोपितजीवाधिष्ठानत्वात् सुखदुःखाद्यनुभव-दशायां 'अहं सुखमनुभवामी'त्यादिप्रतिभासतः तत्तज्जीवाभिन्नत्वं प्रा-प्नोति, यथा इदंरजतमिति भ्रमे इदमंशस्तु वस्तुतः शुक्त्यंशोपि सन् तदारोपितरजताभेदेन प्रतिभासते, तद्वदिति ॥

(५) केचित्तु—अविद्याप्रतिबिम्बजीव एव साक्षी। साक्षित्वं नाम उदासीनत्वे सति साक्षाद्द्रष्टृत्वम्। तच्चासङ्गोदासीनस्वप्रकाशस्य जीवस्यैव सम्भवेत्, नेश्वरस्य परोक्षस्य। कर्तृत्वादिकं च जीवस्य बुद्धि-तादात्म्याद्युज्यते। "एको देवः सर्वभूतेषु गूढः" "द्वा सुपर्णा सयुजे"—त्यादिमन्त्राणां तु जीवत्वापन्नपरमात्मपरत्वोपगमान्न कोपि विरोध इति जीवभिन्नेश्वरस्य साक्षित्वं निराकुर्वन्ति ॥

(६) अन्ये तु—अविद्याप्रतिबिम्बितकेवलजीवस्य साक्षित्वं न सम्भवति निखिलसुखदुःखादिसाक्षात्कारप्रसङ्गात्, किन्तु तस्यैव तत्त-दन्तःकरणोपहितस्य साक्षित्वं, तद्विशिष्टस्य प्रमातृत्वं, इति प्रमातृसा-क्षिणोर्भेदं वर्णयन्ति ॥ विशेषणत्वं नाम—विद्यमानत्वे सति कार्यान्वयि-त्वे सति व्यावर्तकत्वम् ॥ उपाधित्वं नाम—विद्यमानत्वे सति कार्यानन्व-

यित्वे सति व्यावर्तकत्वम् ॥ उपलक्षणत्वंनाम—अविद्यमानत्वे सति कार्यानन्वयित्वे सति व्यावर्तकत्वम् ॥ एतल्लक्षणपदानां तु प्रयोजनमन्यत्र द्रष्टव्यं, विस्तरभयान्नेह वितन्यते ॥

॥ (१९) ॥

ननु अविद्याहङ्कारादीनामनावृतसाक्षिभास्यत्वनियमात् स्वाश्रयावारकाविद्यावृतः तदधिष्ठानभूतः साक्षी कथं तदवभासको भवेदिति चेत्—

(१) अत्राहुः केचित्—यथा राहुग्रस्तश्चन्द्रः आवृत एव राहुं प्रकाशयति, तथा अविद्यावृत एव साक्षी अविद्यादीन् प्रकाशयतीति ॥

(२) अन्ये तु—यथा राहुणा सर्वात्मना ग्रस्तस्य चन्द्रमण्डलादेः स्वावारकराहुमात्रप्रकाशकत्वेपि तदितरघटाद्यनवभासकत्वम्, एवं सर्वात्मनाऽऽवृतस्य साक्षिणः स्वावारकाविद्यामात्रप्रकाशकत्वेपि तद्भिन्नाहङ्काराद्यनवभासकत्वप्रसङ्गात् तेषां च अनावृतसाक्षिचैतन्यसम्बन्धादेव सर्वदाऽज्ञानसंशयविपरीतज्ञानाभावानुभवाच्च अविद्या स्वाश्रयसाक्षिचैतन्यं विहायैव अन्यद्बिम्बचैतन्यमावृणोतीत्यनुभवानुरोधादङ्गीकर्तव्यमित्याहुः ॥

॥ (२०) ॥

ननु साक्षिणश्चैतन्यस्याज्ञानानावृतत्वे स्वस्वरूपभूतानन्दादेरप्यनावृतत्वप्रसङ्गः, सत्यज्ञानानन्दानामभेदात्, "सत्यं ज्ञानमनन्तंब्रह्म" "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिभ्यः, इति चेत्—

(१) अत्राहुः केचित्—प्राणिमात्रस्य दुःखदशायामपि स्वात्मनि प्रकाशमानस्वरूपानन्दविषयकनिरुपाधिकप्रीतेर्दर्शनादिष्टापत्तिरिति ॥

ननु—संसारदशायामपि स्वरूपानन्दप्रकाशाभ्युपगमे मुक्तिसंसारयोरविशेषापत्तिरिति चेत्—

अत्राहुः अद्वैतविद्याचार्याः—उत्कृष्टधवलरूपस्य मालिन्यतारतम्ययुक्तानेकदर्पणप्रतिबिम्बे उपाधिमालिन्यतारतम्यवशात् प्रतिबिम्बे धावल्यापकर्षतारतम्याध्यासवत्, वस्तुतो निरतिशयैकरूपस्वरूपानन्दस्य उपाधिमालिन्यतारतम्यदोषात् उत्कर्षापकर्षाध्यास इति संसारदशायां सातिशयत्वम्। विद्योदये निखिलाध्यासनिवृत्तेः सातिशयत्वापायात्कृतकृत्यतेति विशेषो मुक्तिसंसारयोरिति ॥

(२) अन्ये तु—एकस्मिन्नेव साक्षिचैतन्ये जीवत्वावच्छेदेनअज्ञत्वादिकं, ईश्वरत्वावच्छेदेन तदभावश्च कल्प्यते यथा; तथा आनन्दो मयि नास्ति, न प्रकाशत इत्यनुभवादानन्दत्रावच्छेदेनावृतत्वं, चित्त्वावच्छेदेनाहङ्काराद्यवभासकचैतन्ये तदभावश्च कल्प्यते ॥ जीवेश्वरत्वादेरिव चिदानन्दत्वादिरूपभेदस्याप्यविद्याकल्पितत्वाभ्युपगमान्नाद्वैतविरोधश्चेति ॥

॥ (२१) ॥

ननु अहङ्काराद्यनुभवरूपस्य साक्षिणो नित्यत्वात्कथमहङ्कारादिस्मृतिः, ज्ञानसूक्ष्मावस्थारूपसंस्कारस्य ज्ञानदशायामभावादिति चेत्—

(१) अत्राहुः केचित्—यद्वस्तुगोचरवृत्त्यवच्छिन्नचैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तद्वस्तुगोचरवृत्त्या तावत्सु पदार्थेषु संस्काराधानमिति नियमः। यथा घटादिविषयकवृत्त्यवच्छिन्नसाक्षिणाऽनित्येन घटादिविषये संस्काराधानं सम्भवति, तथा तेनैव वृत्त्यवच्छिन्नसाक्षिचैतन्येना-

हङ्कारादावपि संस्काराधानं सम्भवतीति नाहङ्कारादिगोचरवृत्त्यपेक्षा पृथगस्ति ॥ ननु—घटादिवृत्त्यवच्छिन्नचैतन्ये सुखदुःखेच्छादीनां प्रकाशसम्भवात्तया तेषु कथं संस्काराधानमिति चेत्, न । अन्तःकरणवृत्तिरूपाणां ज्ञानसुखेच्छादीनां स्वावच्छिन्नचैतन्यभास्यत्वनियमात्, चैतन्यस्य नित्यत्वेप्यवच्छेदकानित्यतया तदवच्छिन्नचैतन्यस्याप्यनित्यत्वेन तन्नाशरूपसंस्कारः सम्भवतीति ॥

(२) अन्ये तु—सुषुप्तादुत्थितस्याविद्याद्यनुसन्धानसिद्धये सुषुप्तौ कल्पितामविद्यागोचराविद्यावृत्तिमिवअहमाकाराविद्यावृत्तिमङ्गीकृत्यअनुसन्धानादिकं समर्थयन्ते ॥

(३) अपरे तु—अहमर्थगोचरा वृत्तिरन्तःकरणवृत्तिरेव; सा च न ज्ञानम्, कृप्तकरणाजन्यत्वात्, किन्तु उपासनादिवृत्तिवत् क्रियारूपैवेति ॥

(४) इतरे तु—अहमर्थगोचरापि मनोवृत्तिर्ज्ञानमेव; तत्करणं च मन एव, तस्य वियत्प्राणपादयोरिन्द्रियत्वं चक्षुरादेरिव भाष्यकारैरेव व्यवस्थापितत्वात्, मामहं जानामीत्यनुभवाच्च । तथा च जन्यज्ञानरूपस्य तस्य नाशात् संस्कारादिकं सम्भवतीति ॥ एवञ्च बाह्यगोचरापरोक्षवृत्तीनामेव आवरणाभिभावकत्वनियमः सिद्धः इति ॥

॥ (२२) ॥

ननु इदं रजतमिति भ्रमस्थले प्रथमं इदमाकारापरोक्षवृत्तिरुदेति, पश्चादिदंरजतमिति भ्रमो भवति । तत्र प्रथमोत्पन्नेदमाकारवृत्तेरज्ञाना-

निवर्तकत्वे पूर्वोक्तनियमभङ्गः, निवर्तकत्वे चोपादानाभावेन भ्रमो न स्यादिति चेत्—

(१) अत्राहुः केचित्—इदमाकारवृत्तिनिवर्त्त्यं इदमंशाज्ञानमन्यत्, रजतोपादानशुक्तित्वादिविशेषांशाज्ञानमन्यत् । तथाच न नियमभङ्गः,न वा रजतोत्पत्त्ययोगः॥ इदमंशस्य अध्यासोपादानाज्ञानविषयत्वात् सविलासाज्ञानविषयः शुक्त्यंशः अधिष्ठानम् । अध्यस्तरजताद्यभेदरहितोपि तदभिन्नत्वेनारोप्यबुद्धौ स्फुरन्निदमंश आधारइति अधिष्ठानाधारयोर्भेदः ॥ अस्मिन्मतेऽधिष्ठानारोप्ययोरेकज्ञानविषयत्वं नास्ति, किन्तु आधारारोप्ययोरेव तदिति न भ्रमस्य शुक्त्याद्यंशोल्लेखित्वमिति ॥

(२) अपरे तु—इदं रजतमिति भ्रमस्थले इदन्तादात्म्येन प्रतीतस्य रजतस्येदमंशाज्ञानमेवोपादानम् । अतः तस्याज्ञानस्येदमाकारवृत्त्या इदमंशाज्ञानावरणशक्तिमात्रनिवृत्तावपि विक्षेपशक्तिमद्विशेषांशाज्ञानानुवृत्त्या अध्यासोपादानत्वं सम्भवतीति ॥

(३) कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायास्तु—इदं रजतमिति इदमंशतादात्म्यविशिष्टरजतगोचरा एकैव इन्द्रियजन्या वृत्तिः । इदं रजतमिति भ्रमरूपवृत्तिव्यतिरेकेण रजतोत्पत्तेः प्राक् इदमाकारा वृत्तिरेव नास्ति। रजतप्रत्यक्षं तु ऐन्द्रियकमेव, न तु साक्षिरूपम् । ज्ञानसमकालोत्पन्नप्रातिभासिकरजते स्वज्ञानात्पूर्वमिन्द्रियसंप्रयोगाभावेपि रजततादात्म्याश्रयेदमर्थसम्प्रयोगादेव स्वस्यापि चक्षुर्ग्राह्यत्वं सम्भव-

ति, चक्षुषा रजतं पश्यामीति प्रातिभासिकरजतस्य स्वसम्प्रयोगाभावेपि चाक्षुषत्वानुभवात् । तथा चाप्रतिबद्धाद्दुष्टेन्द्रियसम्प्रयोगाद्भवन्ती इदमर्थगोचरा वृत्तिः स्वकालोत्पन्नरजतविशिष्टेदमर्थं विषयीकरोति, स्वगोचरवृत्तौ स्वस्य स्वतादात्म्याश्रयस्य वा इन्द्रियेण सह सम्प्रयोगः कारणमिति कल्पनात् ॥ धर्मिज्ञानस्य कारणत्वपक्षे—इदमाकारा वृत्तिरविद्याक्षोभिका । चक्रवर्तिपक्षे—धर्मिज्ञानहेतुसम्प्रयोगोऽविद्याक्षोभक इति ॥

(४) अन्ये तु—अध्यासकारणात्वेनाधिष्ठानगोचरेदमाकारां वृत्तिमभ्युपगम्य तदभिव्यक्तसाक्षिणैव स्वाध्यस्तरजतप्रकाशसम्भवात् इदंवृत्त्यैव रजतसंस्कारस्य च सम्भवात् , रजताकारा वृत्तिर्व्यर्थेवेति मन्यन्ते॥

(५) केचन—स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति ज्ञानद्वयाङ्गीकर्तृपक्षे अध्यासकारणीभूता इदंवृत्तिरेका, इदंरजतमिति द्वितीया तु इदमंशतदध्यस्तरजतोभयगोचरा इत्याहुः ॥

(६) इतरे तु—ज्ञानद्वयमिति पक्षे एव इदमित्येका वृत्तिः । इदं रजतमिति द्वितीया तु अध्यस्त-रजत-रजतेदन्त्व-संसर्गमात्रगोचराऽविद्यावृत्तिरिति । तत्र इदमंशविषयावच्छिन्नचैतन्यस्थाविद्या रजताकारेण परिणमते । इदमंशविषयकवृत्तिज्ञानावच्छिन्नचैतन्यस्थाविद्या अध्यस्तरजतगोचरवृत्तिज्ञानाभासरूपेण परिणमते इति ॥

॥ (२३) ॥

ननु अविनिर्गतवृत्त्यवच्छिन्नकेवलसाक्षिचैतन्येनैव सकलविषयप्रकाशतत्संस्काराद्युपपत्तौ वृत्तिनिर्गमो व्यर्थ इति चेत्—

(१) अत्राहुः केचित्—प्रत्यक्षपरोक्षज्ञानयोर्वैलक्षण्यमनुभवसिद्धम्। तच्च प्रत्यक्षस्थले वृत्तिनिर्गमाभ्युपगमे एवसम्भवति। बहिर्निर्गतवृत्त्यवच्छिन्नचैतन्यं अपरोक्षज्ञानम्, अनिर्गतवृत्त्यवच्छिन्नचैतन्यं परोक्षज्ञानमिति च। तत्र प्रत्यक्षस्थले विषयावच्छिन्नचैतन्यमेव विषयप्रकाशकः, न जीवचैतन्यम्। तस्यानुपादानत्वेन साक्षात्तादात्म्यसम्बन्धाभावेऽन्यस्य स्वरूपसम्बन्धादेः कल्पनायोगात्। तादृशविषयाधिष्ठानब्रह्मचैतन्यस्यावृतत्वात् आवरणाभिभवरूपाभिव्यक्तिसिद्ध्यर्थं वृत्तिनिर्गमाभ्युपगमआवश्यकः। परोक्षस्थले तु वृत्तिनिर्गमनहेतुसन्निकर्षाभावादगत्याऽनिर्गतवृत्त्यवच्छिन्नचैतन्यमेव स्वरूपसम्बन्धेन विषयविषयकमिति॥

(२) अपरे तु—अहङ्कारादिष्वापरोक्ष्यस्य साक्षाच्चैतन्यसंसर्गप्रयुक्तत्वेन घटादावपि स्वसंसृष्टमेव चैतन्यमापरोक्ष्यहेतुरिति तदभिव्यक्तये वृत्तिनिर्गमोऽभ्युपेय इति॥

(३) अन्ये तु—शब्दानुमानावगतपरोक्षज्ञानग्राह्यापेक्षया प्रत्यक्षग्राह्यगन्धादावभिव्यक्ता परोक्षैकरसचैतन्यतादात्म्यात् स्पष्टता विषयताविशेषरूपाऽस्ति। तत्सिद्धये वृत्तिनिर्गम इति मन्यन्ते॥

॥ (२४) ॥

ननु ज्ञानाज्ञानयोर्विरोधे समानविषयकत्वमात्रं प्रयोजकमङ्गीकृत्य विषयचैतन्यगतस्य अज्ञानस्य अविनिर्गतवृत्त्यैव निवृत्तिसिद्धेस्तन्निर्गमो व्यर्थ इति चेत्—

(१) अत्राहुः केचित्—वृत्तिनिर्गमानभ्युपगमे ज्ञानाज्ञानयोर्विरोधप्रयोजकस्य समानाश्रयत्वे सति समानविषयकत्वस्य दुर्निरूपत्वेन विरोधो न स्यादिति तन्निर्वाहाय निवर्तकज्ञानस्य अज्ञानाश्रयचैतन्यसंसर्गनियतत्वरूपविशेषणसिद्धये वृत्तिनिर्गमोऽभ्युपेय इति ॥

(२) अन्ये तु—विषयगताज्ञानस्य अन्वयव्यतिरेकाभ्यां ज्ञाननिवर्त्यत्वदशायां लाघवात् समानाधिकरणज्ञाननिवर्त्यत्वं गृह्यत इति तत्सिद्ध्यर्थं वृत्तिनिर्गमः फलतीत्याहुः ॥

(३) अपरे तु—समानाधिकरणयोरेव तमःप्रकाशयोर्निवर्त्यनिवर्तकभावस्य दृष्टत्वेन दृष्टानुरोधाज्ज्ञानाज्ञानयोरपि समानाधिकरणयोरेव निवर्त्यनिवर्तकभावः कल्प्यत इति तदर्थं वृत्तिनिर्गम इत्याहुः ॥

(४) इतरे तु—आवरणाभिभवार्थं वृत्तिनिर्गमानभ्युपगमेपि, चिदुपरागार्थं वा प्रमातुर्विषयावभासकब्रह्मचैतन्येन अभेदाभिव्यक्त्यर्थं वा वृत्तिनिर्गम इत्याहुः ॥

॥ (२५) ॥

ननु किमस्ति जीवब्रह्माभेदे प्रमाणमिति चेत्—

(१) अत्राहुः केचित्—जीवब्रह्मैक्यसिद्धौ सर्वे वेदान्ताः प्रमाणम्, "तत्त्वमसि" "अहम्ब्रह्मास्मि" "अयमात्मा ब्रह्म" इत्यादिश्रुतिभ्यः । एवं च प्रत्यगभिन्नेऽद्वये ब्रह्मणि सर्वेषां वेदान्तानां उपक्रमादिषड्विधतात्पर्यग्राहकलिङ्गैः समन्वयः सिद्ध इति ॥

इति श्रीवासुदेवब्रह्मेन्द्रसरस्वतीविरचिते सिद्धांतलेशतात्पर्यसङ्ग्रहे
प्रथमपरिच्छेदः सम्पूर्णः ॥

॥ ॐ ॥

अथ द्वितीयपरिच्छेदः ॥

॥ (१) ॥

ननु प्रत्यगभिन्नेऽद्वये ब्रह्मणि वेदान्तानां समन्वयो न सिद्ध्यति, घटपटादिद्वितीयप्रपञ्चसत्ताग्राहिप्रत्यक्षादिप्रमाणविरोधात् इति चेत्—न॥

(१) अत्राहुः तत्वशुद्धिकाराः—प्रत्यक्षादिप्रमाणं न घटादितन्निष्ठपारमार्थिकत्वं वा गृह्णाति । किन्तु घटाद्यनुविद्धं तदधिष्ठानं निर्विशेषचिन्मात्रम्, इदमंशवत् । सर्वस्माद्भिन्नत्वेन प्रतीयमानं भेदप्रतियोगि घटादिकं तु साक्षिरूपभ्रान्त्या प्रतिभासते, आरोपितरजतांश इव, इति ॥

(२) न्यायसुधाकृतस्तु—घटादेरिन्द्रियग्राह्यत्वेपि मिथ्यात्वबोधकश्रुतीनां न प्रत्यक्षविरोधः, सन् घट इत्यादिप्रत्यक्षेण घटादौ प्रतीयमानस्य सत्त्वस्य अधिष्ठानभूतब्रह्मगतत्वेन स्वीकारादित्याहुः ॥

(३) संक्षेपशारीरकाचार्यास्तु—प्रत्यक्षस्य पराग्विषयघटादौ पृथग्व्यावहारिकसत्त्वग्राहित्वेपि तस्य प्रमाणाभासत्वात् न तेन तत्त्वावेदकप्रमाणश्रुतिबाध इति ॥

(४) केचित्तु—घटादिसत्त्वग्राहिप्रत्यक्षस्य प्रामाण्येपि, तद्ग्राह्यघटादिसत्त्वस्य सत्ताजातिरूपत्वेन वा तत्तद्देशकालसम्बन्धरूपत्वेन वा घटादिस्वरूपत्त्वेन वा मिथ्यात्वाविरोधित्वात्, तद्बोधकश्रुतीनां न प्रत्यक्षविरोधः इत्याहुः ॥

(५) अपरे तु—अबाध्यत्वरूपसत्त्वस्य प्रत्यक्षग्राह्यत्वेपि न मिथ्यात्वश्रुतिविरोधः । कालत्रयाबाध्यत्वरूपसत्त्वमेव मिथ्यात्वविरोधि; तच्च ब्रह्मण एव । प्रपञ्चस्य तु यावद्ब्रह्मज्ञानमबाध्यत्वरूपं सत्त्वम्, तच्च न मिथ्यात्वविरोधीति, न मिथ्यात्वश्रुतेः प्रत्यक्षविरोध इत्याहुः ॥

(६) अन्ये तु—कालत्रयाबाध्यत्वरूपसत्त्वग्राहित्वेन प्रत्यक्षस्य श्रुतिविरोधित्वेपि न मिथ्यात्वसिद्ध्यनुपपत्तिः । श्रुत्या अपच्छेदन्यायेन परत्वोपेतया निर्दोषया, दोषशङ्काकलङ्कितस्य प्रथमप्रवृत्तस्य प्रत्यक्षस्य बाधोपपत्तेः । न चैवं प्रत्यक्षस्योपजीव्यत्वादुपजीव्यविरोध इति वाच्यम् । श्रुत्या तावत् वर्णपदवाक्यात्मकप्रत्यक्षांशमुपजीव्य अनुपजीव्यतत्सत्यत्वांशस्य केवलमुपमर्दनात् इत्याहुः ॥

॥ (२) ॥

ननु आगमस्य प्रत्यक्षात्प्राबल्ये तर्हि किमर्थं प्रत्यक्षाविरोधाय "यजमानः प्रस्तरः" "सोमेन यजेत" इत्यादौ श्रौतस्य प्रस्तरशब्दस्य सोमशब्दस्य च गौणी वृतिरङ्गीकृतेति चेत्—

(१) अत्राहुर्भामतीकाराः—तात्पर्यवती श्रुतिः प्रत्यक्षाद्बलवती न तु श्रुतिमात्रम् । अद्वैतश्रुतिस्तु उपक्रमादिषड्विधलिङ्गावगमिततात्पर्या प्रत्यक्षाद्बलवतीत्यतः प्रत्यक्षस्यैव बाधइति ॥

(२) विवरणानुयायिनस्तु—न तात्पर्यवत्त्वेन श्रुतेः सतः प्राबल्यं, किन्तु निर्दोषत्वात् परत्वाच्च श्रुतिमात्रस्य प्रत्यक्षात्प्राबल्यमित्युत्स-

---

१ प्रत्यक्षात् ।

र्गः । यत्र श्रुतिबाधितं प्रत्यक्षं निरवकाशम् तत्र प्रत्यक्षेण श्रुतिरेव बाध्यते । तथा च प्रत्यक्षमपि अर्थक्रियासमर्थव्यावहारिकविषये चरितार्थमित्याहुः ॥

ननु—अपच्छेदन्यायेन[1] प्रत्यक्षाच्छ्रुतेरिव, वेदोपक्रमन्यायेन[2] प्रत्यक्षस्यैव श्रुतेः प्राबल्यं कुतो न स्यात् विनिगमनाविरहादिति चेत्—

अत्राहुः केचित्—उपक्रमन्यायप्रवृत्तिस्तु[3] तत्रैव यत्र परस्य पूर्वापेक्षेति एकवाक्यता प्रतीयते । प्रत्यक्षागमयोस्तु एकवाक्यताभावात्प्रत्यक्षमविगणय्य अद्वैतागमस्यैवापच्छेदन्यायेन स्वार्थबोधकत्वं इत्यस्त्येव विनिगमना[3] । अतएव लोकेपि प्रथमप्रवृत्तं शुक्तिरूप्यप्रत्यक्षमाप्तोपदेशेन बाध्यत इति ॥

॥ (३) ॥

ननु आगमापेक्षया उपजीव्यत्वेन प्रत्यक्षस्यैव प्राबल्यम् । अपच्छेदशास्त्रयोर्हि न पूर्वं परस्योपजीव्यमिति युक्तः पूर्वस्य परेण बाधस्तत्र । इह तु उपजीव्यत्वात्पूर्वस्य वर्णपदादिस्वरूपविषयकप्रत्यक्षस्य न परेण "नेह नाना" इत्यागमेन बाध इति चेत्—

(१) अत्राहुः केचित्—भ्रमप्रमासाधारणमेव प्रत्यक्षमुपजीव्यम् ,

---

१. पूर्वमीमांसायां अ. ६. पा० ५. सू० ५४ ज्योतिष्टोमे उद्गात्राद्यपच्छेदे प्रायश्चित्तविचारे, उत्पद्यमानमुत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते, इत्यधिकृत्य निर्णीतम् ॥

२. उपक्रमोपसंहार इत्यादिषड्लिंगेषु क्रमेण पूर्वपूर्वस्य प्रबलत्वम् ॥

३. अन्यतरपक्षपातिनी युक्तिः ॥

न तद्वर्णपदादिस्वरूपम् । अतः श्रुत्या स्वरूपोपमर्देपि नोपजीव्यविरोध इति ॥

(२) अन्ये तु—निर्विषयवाक्याच्छाब्दबोधानुदयेन वर्णपदादिस्वरूपयोग्यतासिद्ध्यपेक्षायामपि नोपजीव्यविरोधः । मुक्तिपर्यन्तस्थाय्यर्थक्रियाकार्यसद्विलक्षणव्यावहारिकप्रपञ्चस्वरूपस्य स्वाधिकरणे संयोगतदत्यन्ताभाववदभ्युपगमादिति ॥

(३) अपरे तु—"नेह नानेति" श्रुत्या सत्यत्वेनैव प्रपञ्चनिषेधात् स्वरूपेण च तस्या निषेधान्नोपजीव्यवर्णपदयोग्यतादिविरोध इत्याहुः ॥

(४) अन्ये तु—ब्रह्मणि पारमार्थिकं सत्यत्वं, प्रपञ्चे व्यावहारिकं, शुक्तिरजतादौ प्रातिभासिकं, इति सत्तात्रैविध्यानङ्गीकाराद्ब्रह्मात्मकाधिष्ठानगतमेकमेव पारमार्थिकं सत्त्वं; तदनुवेधादेव घटादौ सर्वत्र सत्प्रतीत्युपपत्तेर्नोपजीव्यवर्णपदादिप्रत्यक्षविरोध इत्याहुः ॥

ननु—ब्रह्मगतपारमार्थिकसत्त्वस्यैव प्रपञ्चेपि भानमभ्युपेत्य तद्व्यतिरिक्तसत्त्वाभासाकल्पने व्यवहितसत्यरजतातिरेकेण शुक्तौ रजताभासोत्पत्तिः किमर्थमभ्युपेयते गौरवादिति चेत्—

अत्राहुः केचित्—असन्निकृष्टस्यापरोक्ष्यासम्भवात् तन्निर्वाहार्थं गौरवमपि प्रामाणिकत्वान्न दोषाय इति तदभ्युपगम इति ॥

॥ (४) ॥

ननु आपरोक्ष्याय रजताभासोत्पत्त्यभ्युपगमे प्रतिबिम्बभ्रमस्थलेपि श्रीवास्थमुखातिरेकेण मुखाभासोत्पत्तिरुपेया स्यात्, इष्टापत्तौ ब्रह्मप्रतिबि-

र्गः । यत्र श्रुतिबाधितं प्रत्यक्षं निरवकाशम् तत्र प्रत्यक्षेण श्रुतिरेव बाध्यते । तथा च प्रत्यक्षमपि अर्थक्रियासमर्थव्यावहारिकविषये चरितार्थमित्याहुः ॥

ननु—अपच्छेदन्यायेन[1] प्रत्यक्षाच्छ्रुतेरिव, वेदोपक्रमन्यायेन प्रत्यक्षस्यैव श्रुतेः प्राबल्यं कुतो न स्यात् विनिगमनाविरहादिति चेत्—

अत्राहुः केचित्—उपक्रमन्यायप्रवृत्तिस्तु[2] तत्रैव यत्र परस्य पूर्वापेक्षेति एकवाक्यता प्रतीयते । प्रत्यक्षागमयोस्तु एकवाक्यताभावात्प्रत्यक्षमविगणय्य अद्वैतागमस्यैवापच्छेदन्यायेन स्वार्थबोधकत्वं इत्यस्त्येव विनिगमना[3] । अतएव लोकेपि प्रथमप्रवृत्तं शुक्तिरूप्यप्रत्यक्षमाप्तोपदेशेन बाध्यत इति ॥

॥ (३) ॥

ननु आगमापेक्षया उपजीव्यत्वेन प्रत्यक्षस्यैव प्राबल्यम् । अपच्छेदशास्त्रयोर्हि न पूर्वं परस्योपजीव्यमिति युक्तः पूर्वस्य परेण बाधस्तत्र । इह तु उपजीव्यत्वात्पूर्वस्य वर्णपदादिस्वरूपविषयकप्रत्यक्षस्य न परेण "नेह नाना" इत्यागमेन बाध इति चेत्—

(१) अत्राहुः केचित्—भ्रमप्रमासाधारणमेव प्रत्यक्षमुपजीव्यम् ,

---

१. पूर्वमीमांसायां अ. ६. पा० ५. सू० ५४ ज्योतिष्टोमे उद्गात्राद्यपच्छेदे प्रायश्चित्तविचारे, उत्पद्यमानमुत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते, इत्यधिकृत्य निर्णीतम् ॥

२. उपक्रमोपसंहार इत्यादिषड्लिंगेषु क्रमेण पूर्वपूर्वस्य प्रबलत्वम् ॥

३. अन्यतरपक्षपातिनी युक्तिः ॥

न तद्वर्णपदादिस्वरूपम् । अतः श्रुत्या स्वरूपोपमर्देपि नोपजीव्यविरोध इति ॥

(२) अन्ये तु—निर्विषयवाक्याच्छाब्दबोधानुदयेन वर्णपदादिस्वरूपयोग्यतासिद्ध्यपेक्षायामपि नोपजीव्यविरोधः । मुक्तिपर्यन्तस्थाय्यर्थक्रियाकार्यसद्विलक्षणव्यावहारिकप्रपञ्चस्वरूपस्य स्वाधिकरणे संयोगतदत्यन्ताभाववदभ्युपगमादिति ॥

(३) अपरे तु—"नेह नानेति" श्रुत्या सत्यत्वेनैव प्रपञ्चनिषेधात् स्वरूपेण च तस्या निषेधान्नोपजीव्यवर्णपदयोग्यतादिविरोध इत्याहुः ॥

(४) अन्ये तु—ब्रह्मणि पारमार्थिकं सत्यत्वं, प्रपञ्चे व्यावहारिकं, शुक्तिरजतादौ प्रातिभासिकं, इति सत्तात्रैविध्यानङ्गीकाराद्ब्रह्मात्मकाधिष्ठानगतमेकमेव पारमार्थिकं सत्त्वं; तदनुवेधादेव घटादौ सर्वत्र सत्प्रतीत्युपपत्तेर्नोपजीव्यवर्णपदादिप्रत्यक्षविरोध इत्याहुः ॥

ननु—ब्रह्मगतपारमार्थिकसत्त्वस्यैव प्रपञ्चेपि भानमभ्युपेत्य तद्व्यतिरिक्तसत्त्वाभासाकल्पने व्यवहितसत्यरजतातिरेकेण शुक्तौ रजताभासोत्पत्तिः किमर्थमभ्युपेयते गौरवादिति चेत्—

अत्राहुः केचित्—असन्निकृष्टस्यापरोक्ष्यासम्भवात् तन्निर्वाहार्थं गौरवमपि प्रामाणिकत्वान्न दोषाय इति तदभ्युपगम इति ॥

॥ (४) ॥

ननु आपरोक्ष्याय रजताभासोत्पत्त्यभ्युपगमे प्रतिबिम्बभ्रमस्थलेपि श्रीवास्थमुखातिरेकेण मुखाभासोत्पत्तिरुपेया स्यात्, इष्टापत्तौ ब्रह्मप्रतिबि-

म्बजीवस्यापि ततो भेदेन मिथ्यात्वापत्त्या मुक्तिभाक्तानुपपत्तिरिति चेत्—

(१) अत्राहुर्विवरणानुयायिनः—ग्रीवास्थमुखे दर्पणोपाधिसन्निधानवशाद्दर्पणस्थत्वादिधर्माध्याससम्भवेन न दर्पणे मुखाध्यासः कल्पनीयः। ग्रीवास्थमुखस्यापरोक्ष्यं तु उपाधिप्रतिहतनयनरश्मीनां परावृत्त्य बिम्बग्राहित्वनियमाभ्युपगमात्। वार्तिके चोक्तम्—

"दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम्।
व्याप्नुवन्त्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम्" इति[1] ॥

(२)अद्वैतविद्याकृतस्त्वाहुः—बिम्बमुखाद्भेदेन तत्सदृशत्वेन चान्यैः पार्श्वस्थैः स्पष्टं दर्पणे निरीक्ष्यमाणं तत्प्रतिबिम्बं ततो भिन्नं स्वरूपतो मिथ्यैव स्वकरगतादिव रजतात् शुक्तिरजतम्। किञ्च, 'नेदं रजतं मिथ्यैव रजतमभात्'इति सर्वसम्प्रतिपन्नबाधात्, न यथा शुक्तिरजतं सत्यम्; एवं 'दर्पणे मुखं नास्ति,मिथ्यैवात्र दर्पणे मुखमभात्'इत्यादि सर्वसिद्धबाधात्प्रतिबिम्बमसत्यमेव। अत्र तु प्रतिबिम्बजीवस्य स्वरूपतो मिथ्यात्वेपि अधिष्ठानात्मना सत्यतया मुक्तिभाक्तोपपत्तिरिति ॥ अयमेव पक्षः प्रतिबिम्बस्य मिथ्यात्वमभ्युपगच्छतां त्रिविधजीववादिनां विद्यारण्यप्रभृतीनामभिमत इति ॥

ननु—प्रतिबिम्बस्य मिथ्यात्ववादे हि शुक्तिरजतादेरिव तस्यापि अन्वयव्यतिरेकशालि अज्ञानमुपादानम्, तन्निवर्तकं ज्ञानं च वाच्यम्। त-

१. बृहदारण्यकवार्तिके अ. १. ब्रा. ४. श्लो. ६१८। तन्मुद्रितपुस्तके—"व्याप्नुवन्त्यविभागेन भ्रान्तिं नो जनयेद्यथा" इत्युत्तरार्धपाठः।

चोभयं न सम्भवति । दर्पणादिरूपाधिष्ठानसाक्षात्कारेणाज्ञानस्य निवृत्त-त्वानिवृत्तत्वाभ्यामनिरूपणादिति चेत्—

अत्राहुः केचित्—शुक्तिरजताद्यध्यासवत् न प्रतिबिम्बाध्यासे केवलाधिष्ठानावारकमज्ञानमुपादानम्, न वाऽधिष्ठानविशेषांशज्ञानं निवर्तकम् । किन्तु आवरणशक्तिमदज्ञानस्य अधिष्ठानज्ञानेन निवृत्तावपि विक्षेपशक्तिमदज्ञानस्य अनिवृत्तत्वात्तदेवोपादानम् । बिम्बोपाध्योः सन्निधिनिवृत्तिसहितं दर्पणे मम मुखं नास्तीति ज्ञानमेव प्रतिबिम्बाध्यासस्य निवर्तकमिति ॥

अन्ये तु—दर्पणाद्युपादानभूतं मूलाज्ञानमेव प्रतिबिम्बाध्यासस्याप्युपादानम् । बिम्बोपाधिसन्निधिनिवृत्तिसहकृतमधिष्ठानज्ञानं तस्य निवर्तकम् । मूलाज्ञानकार्यत्वेपि प्रतिबिम्बाध्यासस्य अविद्यातिरिक्तबिम्बसन्निधानरूपदोषजन्यत्वात् प्रातीतिकत्वमपीति ॥

॥ (५) ॥

ननु स्वप्नाध्यासस्य किमुपादानमिति चेत्—

(१) अत्राहुः केचित्—"सुषुप्त्याख्यं तमोऽज्ञानं यद्बीजं[1] स्वप्नबोधयोः" इति स्वप्नजाग्रत्प्रपञ्चयोरेकाज्ञानकार्यत्वप्रतिपादकप्राचीनवचनानुरोधात् प्रतिबिम्बाध्यासवत् स्वप्नाध्यासस्यापि मूलाज्ञानकार्यतया ब्रह्मज्ञानैकबाध्यत्वमेष्टव्यम् । अविद्यातिरिक्तनिद्रादिदोषजन्यतयैव प्रातिभासिकत्वं चेति ॥

(२) "बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे" इति भाष्योक्तेः[2] स्वप्नाध्यासस्य मूलाज्ञानकार्यत्वेपि ब्रह्मज्ञानेतरजाग्रद्बोधबाध्यत्वात्

१. उपादानं. कारणं २. ब्र. सू. ३।२।३ स्य भाष्ये ।

प्रातिभासिकत्वं, रज्जुसर्पाध्यासस्येव स्वानन्तरोत्पन्नदण्डभ्रमबाध्यस्य —इत्यन्ये ॥

(२) इतरे तु—जाग्रत्प्रपञ्चं तद्द्रष्टारं चावृत्य जायमानो निद्रारूपो मूलाज्ञानावस्थाभेदः स्वप्नाध्यासस्योपादानम्, स्वप्नप्रपञ्चस्य तद्द्रष्टुः प्रातिभासिकजीवस्य चाधिष्ठानभूतव्यावहारिकजीवयाथात्म्यज्ञानेन निवृत्तिः । न च स्वप्नद्रष्टुः प्रातिभासिकजीवस्यापि बाधे स्वाप्नपदार्थानुसन्धानं न स्यादिति शङ्क्यम्, प्रातिभासिकजीवस्य व्यावहारिकजीवेऽध्यस्ततया तादात्म्यसत्त्वात् व्यावहारिकजीवस्य प्रातिभासिकानुभवेन तदनुसन्धातृत्वोपपत्तेरिति ॥

॥ (६) ॥

ननु अनवच्छिन्नचैतन्यस्य स्वप्नप्रपञ्चाधिष्ठानत्वपक्षे स्वाप्नगजादेर्बाह्यदेशस्थत्वं वक्तव्यम् । तथा च तस्य विच्छिन्नदेशत्वेन न साक्षिभास्यत्वम्, इन्द्रियाणामुपरतत्वेन च प्रकाशायोगः ॥ अहङ्कारोपहितचैतन्याधिष्ठानत्वपक्षे तु अहं गजो गजवानिति वा धीप्रसङ्ग इति चेत्—

(१) अत्राहुः केचित्—प्रथमपक्षेऽहङ्कारानवच्छिन्नमान्तरमीश्वरचैतन्यं बिम्बात्मकं स्वप्नप्रपञ्चस्याधिष्ठानमभ्युपेत्य तस्य च देहान्तरिन्द्रियानपेक्षं स्वतन्त्रान्तःकरणवृत्त्यभिव्यक्तस्यावभासकत्वमिति ॥

(२) अन्ये तु—अविद्यायां प्रतिबिम्बभूतं जीवचैतन्यं स्वतोऽपरोक्षमहङ्कारानवच्छिन्नं स्वप्नप्रपञ्चस्याधिष्ठानम् । एवञ्च स्वप्नगजादाविदं पश्यामीत्यादिव्यवहारस्तु प्रमातुरहङ्कारानवच्छिन्नाधिष्ठानचैतन्यगोचरान्तःकरणादिवृत्तिकृताभेदाभिव्यक्त्येति ॥

---

१. तथा च स्वाप्नगजाद्यधिष्ठानचैतन्यस्य वृत्तिद्वारा वृत्तिमदन्तःकरणसंबन्धेन प्रमातृत्वप्राप्तौ सत्यां प्रमातुस्तद्द्रष्टृत्वं संभवतीत्यर्थः ॥

(३) अपरे तु—द्वितीयपक्षं समर्थयन्ते—अहङ्काराद्युपहितजीवचैतन्यमेवाधिष्ठानम्, नत्वहङ्कारविशिष्टम्। अतो नाहं गज इत्याद्यनुभवापत्तिरिति ॥

(४) केचित्तु—अन्तःकरणोपहितस्य स्वप्नाधिष्ठानत्ववत् वृत्तिमदन्तःकरणप्रतिबिम्बितशुक्तीदमंशावच्छिन्नचैतन्ये शुक्तिरजताद्यध्यस्यते, न तु सर्वसाधारणबिम्बचैतन्ये; सुखादिवदनन्यवेद्यत्वादिति ॥

(५) इतरे तु—इदमंशावच्छिन्नबिम्बभूतब्रह्मचैतन्य एव तदध्यासः। तत्तदविद्याश्रयपुरुषग्राह्यत्वात्तस्यैव प्रत्यक्षं नान्यस्येत्यनन्यवेद्यत्वं समर्थयन्ते ॥

॥ (७) ॥

ननु शुक्तिरजतादौ चाक्षुषत्वानुभवः साक्षात्परम्परया वा साध्यताम्। स्वाप्नपदार्थेषु तादृशानुभवः कथमुपपन्न इति चेत्—

(१) अत्राहुः केचित्—स्वप्ने चक्षुरादीन्द्रियाणामुपरतत्वात् श्रुत्यादौ स्वयंज्योतिष्ट्ववादे[1] तथैव प्रतिपादनाच्च, चाक्षुषत्वानुभवो भ्रम एवेति ॥

(२) दृष्टिसृष्टिवादिनस्तु—अत्यन्तोत्तमाधिकारिणां कृत्स्नस्य जाग्रत्प्रपञ्चस्य दृष्टिसमकालसृष्टिमभ्युपेत्य कल्पितस्याज्ञातसत्त्वाभावात् दृष्टेः पूर्वं घटाद्यभावेन जाग्रदर्थानुभवस्यापि स्वाप्नवदेव अनैन्द्रियकत्वात् केवलसाक्षिरूपत्वमित्याहुः ॥

॥ (८) ॥

---

१ "अत्रायं पुरुषः स्वयंज्योतिर्भवति" इत्यादि, बृहदारण्यकोपनिषदि चतुर्थाध्याये तृतीयब्राह्मणे नवमखंडे । २. दृष्ट्या सह समः कालः यस्याः सा--सा चासौ सृष्टिश्चेति—ताम् ।

ननु दृष्टिसृष्टिवादे—साविद्यस्य प्रपञ्चजातस्य निरुपाधिकः शुद्ध आत्मा कल्पक इति न शक्यते वक्तुम्, मोक्षेपि कल्पकसत्त्वेन प्रपञ्चानुवृत्तिप्रसङ्गात्; नाप्यविद्योपहितः, तस्य कल्पकत्वे अविद्यासृष्टेः पूर्वमविद्योपहितस्य कल्पकस्याभावात्अविद्यासृष्ट्यनुपपत्त्या संसारानुपलब्धिप्रसङ्ग इति चेत्—

(१) अत्राहुः केचित्—अनिदम्पूर्वकत्वेन कल्पककल्पनाप्रवाहस्यानादित्वात् पूर्वपूर्वकल्पितावियोपहित उत्तरोत्तराविद्याकल्पकः। न चाविद्याया अनादित्वे कल्पितत्वं न स्यादिति शङ्क्यम्; यथा स्वप्ने कल्प्यमानं गोपुरादि किञ्चित्पूर्वसिद्धत्वेन किञ्चित्तदानीमुत्पन्नत्वेन च कल्प्यते, तथा जागरेपि किञ्चित्सादित्वेन किञ्चिदनादित्वेन च कल्प्यत इति साद्यनादिविभागोपपत्तेरिति ॥

(२) अन्ये तु—अविद्यादेरनादित्वान्न तत्कल्पक आत्मा । किन्त्वेतद्व्यतिरिक्तप्रपञ्चस्यैवेति प्राहुः ॥

(३) अपरे तु—पूर्वं दृष्टिसमसमया विश्वसृष्टिरिति अयमेको दृष्टिसृष्टिवाद उक्तः ॥ इदानीमपरो दृष्टिरेव विश्वसृष्टिरिति। तत्र दर्शनं सृष्टिः अदर्शनं लयः इतिन्यायात्; दृष्टिश्च स्वप्रकाशात्मचैतन्यमेव, सृष्टिशब्दश्च सृज्यमानप्रपञ्चपरः । तथाच दृश्यप्रपञ्चतादात्म्यापन्नं स्वरूपज्ञानमेव प्रपञ्चस्य आद्यक्षणावच्छिन्नं सत् तस्य सृष्टिरित्युच्यत इति॥

(४) इतरे तु—अत्यन्तमन्दाधिकार्यर्थं पूर्वोक्तद्विविधदृष्टिसृष्टिवादाद्विलक्षणं सृष्टदृष्टिवादं रोचयन्ते । सृष्टे=श्रुत्युक्तक्रमेण ईश्वरसृष्टेऽ-

ज्ञातसत्ताके प्रपञ्चे, दृष्टिः=तत्तद्विषयप्रमाणावतरणेन तस्य तस्य ज्ञानं, सृष्टदृष्टिः । अस्मिन्मते प्रपञ्चस्य शुक्तिरजतादिवत् सम्प्रयोग-संस्कार-दोष-रूपकारणत्रयेण वा, अधिष्ठानज्ञान-संस्कार-दोष-रूपकारणत्रयेण वा जन्यासद्भ्रान्त्यकल्पितत्वेन कल्पनासमसमयत्वाभावेपि ज्ञानैकनिवर्त्यतया वा, सदसद्विलक्षणतया वा, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगितया वा, मिथ्यात्वमभ्युपेयमिति ॥

॥ (९) ॥

ननु वियदादेरिव अहङ्कारतद्धर्माणां पूर्वोक्तमिथ्यात्वमकल्पितत्वेपि सिद्ध्यति, अतो भाष्यटीकाविवरणेषु तदध्यस्तत्वसाधनाय कारणत्रयसम्पादनं किमर्थमिति चेत्—

(१) अत्राहुश्चित्सुखाचार्याः—अहङ्कारादीनामपि केवलसाक्षिभास्यतया शुक्तिरजतादिवत् प्रातिभासिकत्वस्य सिद्धत्वात् न कारणत्रितयसम्पादनवैयर्थ्यमिति ॥

(२) रामाद्वयाचार्यास्तु—अहङ्कारादीनां साक्षिवेद्यत्वेपि व्यवहारदशायां बाधानुपलम्भाद्व्यावहारिकत्वमेव । विवरणे कारणत्रितयसम्पादनं तु प्रौढिवादेनेति ॥

॥ (१०) ॥

ननु दृष्टिसृष्टिवादे सृष्टदृष्टिवादे च जाग्रत्प्रपञ्चस्य मिथ्यात्वेन सम्प्रतिपन्नत्वात् कथमर्थक्रियासमर्थत्वमिति चेत्—

(१) अत्राहुः केचित्—यथा स्वाप्नजलाद्यवगाहनादिरूपस्वसमानसत्ताकार्थक्रियाकारित्वं सर्वसम्प्रतिपन्नं प्रातिभासिकपदार्थानां स-

त्यार्थक्रियाकारित्वाभावेपि, एवं जाग्रत्प्रपञ्चस्यापि तत्समानमिति नैतावता पारमार्थिकसत्यत्वसिद्धिरिति ॥

(२) अद्वैतविद्याचार्यास्तु—असत्यस्य सत्यार्थक्रियाकारित्वमपि सम्भवति। प्रातिभासिकस्वाप्नभुजङ्गमाङ्गनादीनां प्रबोधाबाध्यभयकम्पसुखादिव्यावहारिकार्थक्रियाया अपि जनकत्वदर्शनादिति ॥

(३) अन्येतु—स्वाप्नपदार्थानामिव जागरेप्यालोकवत्यपवरके सद्यःप्रविष्टपुरुषकल्पितसन्तमसस्याप्यर्थक्रियाकारित्वं सम्भवतीति ॥

(४) अपरेतु—अर्थक्रियाकारित्वे न सत्यत्वं प्रयोजकम्, अपि तु तत्तत्स्वरूपमात्रम्। मरीच्युदकशुक्तिरजतादेः प्रसिद्धोदकाद्युचितार्थक्रियाकारित्वापादनं तु उदकत्वादिजात्यभावात् निराकरणीयमिति ॥

(५) इतरे तु—मरीच्युदकादावपि उदकत्वादिजातिरस्ति; तद्वैशिष्ट्येनोल्लेखिभ्रमप्रत्ययदर्शनात्, तदर्थिनस्तत्र प्रवृत्तिदर्शनाच्च। मरीच्युदकादौ तदर्थिप्रवृत्तिरूपाऽर्थक्रिया च सम्भवति। नहि सर्वा अर्थक्रिया सर्वत्र सम्भवति, क्वचित्कासाञ्चिदेवार्थक्रियाणामिष्यमाणत्वादिति ॥

॥ (११) ॥

ननु प्रपञ्चगतमिथ्यात्वरूपधर्मस्य सत्यत्वेपि ब्रह्मणोऽद्वितीयत्वहानिः। मिथ्यात्वेपि च प्रपञ्चसत्यत्वापत्त्या अद्वैतक्षतिरेवेति चेत्—

(१) अत्राहुरद्वैतदीपिकाकाराः—मिथ्यात्वस्य मिथ्यात्वेपि न प्रपञ्चसत्यत्वापत्तिः। प्रपञ्चसमानसत्ताकत्वं हि मिथ्यात्वम्। तच्च

---

१. तत्=स्वसमानसत्ताकार्थक्रियाकारित्वम्। २ प्रपंचः व्यावहारिकसत्ताकः।

धर्मिणः सत्यत्वप्रतिक्षेपकम् ॥ सत्तात्रैविध्यपक्षे—स्वाश्रयसमसत्ताकधर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वमिति मिथ्यात्वप्रयोजकत्वात् । एकसत्तापक्षे तु—स्वाश्रयसाक्षात्कारानिवर्त्यधर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वमिति च मिथ्यात्वप्रयोजकत्वात् । एवञ्च कल्पितमपि प्रपञ्चमिथ्यात्वं प्रपञ्चसाक्षात्कारानिवर्त्यत्वात् सत्यत्वप्रतिक्षेपकमेव । ब्रह्मनिष्ठसप्रपञ्चत्वं तु ब्रह्मसाक्षात्कारनिवर्त्यत्वान्न निष्प्रपञ्चत्वप्रतिक्षेपकमिति ॥

॥ (१२) ॥

ननु वियदादिप्रपञ्चस्य मिथ्यात्वे सिद्धेपि सुखदुःखादिव्यवस्थया परस्परभिन्नानां जीवानामेकेन ब्रह्मणैक्यासम्भवात् तेषामपवर्गभाक्त्वेन सत्यत्वाच्च नाद्वैतसिद्धिरिति चेत्—

(१) अत्राहुः केचित्—न हि जीवानां सच्चिदाद्यात्मनां परस्परं भेदः सम्भवति[1] । सुखदुःखादिव्यवस्थायास्तूपाधिभेदादेवोपपत्तेरिति ॥

॥ (१३) ॥

ननु उपाधिभेदेप्यात्मनोऽभेदानपायात् कथं सुखदुःखादिव्यवस्था सिद्धचतीति चेत्—

(१) अत्राहुः केचित्—"असङ्गो ह्ययम्पुरुषः" "असङ्गो न हि सज्जते" इत्यादिश्रुतिभिश्चिन्मात्रस्यात्मन औदासीन्यप्रतिपादनात्, "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वम्मन एव" "विज्ञानं यज्ञं तनुते" इत्यादिश्रुतिभिरन्तःकरणस्यैव सुखदुःखाद्यखिलानर्थाश्रयत्वप्रतिपादनाच्च तद्भेदादेव सुखदुःखादिव्यवस्था सिद्धचतीति ॥ कथं तर्ह्यात्मनः कर्तृत्वादिबन्धाश्रयत्वेन अहङ्कर्ता सुखी-

---

१. भेदे प्रमाणाभावात्, अभेदे च "एको देवः सर्वभूतेषु" इत्यादिश्रुतेरित्यर्थः ।

त्यादिव्यवहारः इतिन शङ्क्यम्,कर्तृत्वादिबन्धाश्रयाहङ्कारतादात्म्याध्यासाधिष्ठानत्वेन तस्य तादृशभ्रमोपपत्तेः । न चान्तःकरणधर्माणामपि सुखदुःखादीनां अनुभवरूपस्य साक्षिण एकत्वात् सुखदुःखादिव्यवस्था न स्यादिति वाच्यम्, तत्तदन्तःकरणभेदेन तत्तदुपहितस्य साक्षिणोपि सुखदुःखाद्यनुभवरूपस्य भेदात् तद्व्यवस्थोपपत्तेरिति ॥

(२) अन्ये तु—जडस्य कर्तृत्वादिबन्धाश्रयत्वानुपपत्तेः 'कर्ता[1] शास्त्रार्थवत्त्वादि'ति न्यायेन चेतनस्यैव कर्तृत्वाद्याश्रयत्वप्रतीतेश्चिदाभास एव तदाश्रयः इति। तस्य चोपाधिभेदेन भेदात् सुखदुःखादिव्यवस्थोपपत्तिः । न चैवं चिदाभासस्य बन्धाश्रयत्वे तस्य च मिथ्यात्वाद्बन्धमोक्षयोर्वैयधिकरण्यापत्तिरिति वाच्यम् । स्वरूपतः सत्यतया मुक्त्यन्वयिनि परमार्थजीवे चिदाभासस्याध्यस्तत्वात् । बन्धो नाम कर्तृत्वाद्याश्रयचिदाभासतादात्म्याध्यासाधिष्ठानत्वमेवेति ॥

(३) अपरे तु—"आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इत्यादिश्रुत्या देहादिविशिष्टस्यैव भोक्तृत्वश्रवणात् देहादिभेदेन तद्विशिष्टभेदाद्व्यवस्था युक्ता। तथा च विशिष्टगतबन्धस्य विशेष्यान्वयिनो मुक्त्यन्वयिनि केवलात्मन्यप्यन्वयः सिद्ध इति बन्धमुक्त्योर्न वैयधिकरण्यमिति ॥

(४) इतरे तु— शुद्धचिन्मात्रात्मैव कर्तृत्वादिबन्धाश्रयः, स्फ-

---

१ ब्रह्मसूत्राणि अ. २ पा. ३ सू. ३३ । २ लौहित्याश्रयस्य जपाकुसुमादेः सन्निधानात् यथा स्फटिके उपाधिभूतजपाकुसुमगतलौहित्यप्रतिबिंबभूतस्य लौहित्यान्तरस्योत्पत्तिः ।

टिकलौहित्यन्यायेन कर्तृत्वाद्याश्रयान्तःकरणसान्निध्यात् आत्मनि कर्तृत्वाद्यन्तरस्याध्यासात्। तस्य चात्मन एकत्वेप्युपाधिभेदात् सुखदुःखादिव्यवस्थोपपत्तेः । न ह्यन्यभेदादन्यत्र विरुद्धधर्मव्यवस्थाऽनुपपन्नेति वाच्यम् । एकस्मिन्वृक्षे मूलाग्रोपाधिभेदमात्रेण संयोगतदभावव्यवस्थादर्शनात्। एकस्याप्याकाशस्य कर्णशष्कुल्याद्युपाधिभेदेनैव श्रोत्रेन्द्रियत्वाद्यापन्नस्य पुरुषभेदेन तत्र तत्र विचित्रशब्दज्ञानजनकत्वदर्शनाच्चेति ॥

(५) एके तु—आश्रयभेदादेव विरुद्धधर्मव्यवस्थेति नियममनुसृत्य यथा मणिमुकुराद्युपाधिकल्पितप्रतिबिम्बरूपाश्रयभेदादेव श्यामावदातत्वादिधर्मव्यवस्था, यथावा अङ्गुल्याद्युपाधिकल्पितनानादीपरूपाश्रयभेदादेव पाश्चात्यपौरस्त्यादिधर्मव्यवस्था च, एवं एकस्मिन्नेव निष्कृष्टचैतन्ये कल्पितान्तःकरणरूपोपाधिभेदेन नानात्वमापन्नजीवरूपाश्रयभेदादेव सुखदुःखादिव्यवस्था सम्प्रतिपन्नेति ॥

॥ (१४) ॥

ननु जीवानां परस्परं सुखदुःखाद्यननुसन्धाने उपाधिरेव प्रयोजक इत्युपपादितम् । कोऽसावुपाधिरिति चेत्—

(१) अत्राहुः केचित्—भोगायतनस्य देहतदवयवहस्तादिरूपस्य भेद एव तदननुसन्धानप्रयोजकोपाधिरिति ॥

(२) अन्ये तु—विश्लिष्टोपाधिभेद एवाननुसन्धानप्रयोजकः । विश्लेषश्च एकस्मिन्नवयविनि अवयवभावेन अननुप्रवेशः। मातृगर्भस्थशरीरयोस्तथात्वादेव न गर्भगतस्य मातृसुखाद्यनुसन्धानप्रसङ्गः । करचरणादीनां संश्लिष्टत्वादेवेतरेतरानुसन्धानसिद्धिः। तथाच अदृष्टविशेषासहकृतस्य

---

१ भिन्नभिन्नात्मनि । २. मातुः तद्गर्भस्थशरीरस्य च इति विग्रहः । ३. विश्लिष्टत्वादेव ।

भोगायतनभेदादेरननुसन्धानप्रयोजकत्वस्य विवक्षितत्वात् न योगिजातिस्मरादिषु व्यभिचार इति ॥

(३) अपरे तु—प्रत्यभिज्ञानायोग्यशरीरभेद एवाननुसन्धानप्रयोजकोपाधिः । न च बाल्ययौवनादिशरीराणामपि भेदः शङ्क्यः, एकत्वप्रत्यभिज्ञानात् । विवर्तवादे विनैवोपचयं मायया केवलं शरीरस्य ऐन्द्रजालिकशरीरवत् वृद्ध्युपपत्तेः, परमाणुप्रक्रियया आरम्भवादे शरीरभेदस्यानभ्युपगमाच्चेति ॥

(४) इतरे तु—अन्तःकरणरूपोपाधिभेद एवाननुसन्धानव्यवस्थाप्रयोजक इति ॥

(५) एके तु—जीवोपाधिभूताज्ञानानि नाना इत्यभ्युपेत्य तद्भेद एवाननुसन्धानप्रयोजक इति ॥

एवञ्च अस्मन्मते ब्रह्मात्मैक्यपर"तत्त्वमसि""अहम्ब्रह्मास्मि" "अयमात्मा ब्रह्म" इत्यादिमहावाक्यानुरोधेनअवान्तरवाक्यानां तात्पर्यवर्णनस्योचितत्वात्, जीवस्य "आकाशवत्सर्वगतश्च नित्यः " " महान्तं विभुमात्मानम्" "महद्भूतमनन्तमपारं" "विज्ञानघन एव" "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्" "अयमात्मा ब्रह्म सर्वानुभूः" "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिभिर्विभुत्वप्रतिपादनात्, परिच्छेद औपाधिक इति भाष्यादिषूभयश्रुत्युपपादनं कृतम्। तस्मादचेतनप्रपञ्चस्य मिथ्यात्वात्, चेतनप्रपञ्चस्य जीवस्य ब्रह्माभेदाच्च, सर्वेषां वेदान्तानामद्वितीये ज्ञानैकगम्ये ब्रह्मणि समन्वयेनाविरोधः सिद्धः इति ॥

इति श्रीवासुदेवब्रह्मेन्द्रसरस्वतीविरचिते सिद्धान्तलेशतात्पर्यसंग्रहे
द्वितीयपरिच्छेदः संपूर्णः ॥

---

१. औपाधिकपरिछिन्नत्व—स्वाभाविकविभुत्व—प्रतिपादकोभयश्रुत्युपपादनम् ।

॥ ॐ ॥

अथ तृतीयपरिच्छेदः ॥

॥ (१) ॥

ननु ब्रह्म ज्ञानेनैवाप्यत इति कथम् । यत्कारणं " तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने " ॥ इत्यादिस्मृत्या कर्मणामपि ब्रह्मप्राप्तिहेतुत्वमुच्यत इति चेत्—

(१) अत्राहुः केचित्—सत्यमेवोक्तम्, तथापि स्वकण्ठाभरणवत् नित्यसिद्धब्रह्मस्वरूपस्यापि सतः स्वाज्ञानमेव स्वस्वरूपाप्राप्तिरिति तदज्ञाननिवृत्तिरूपस्वप्राप्तौ ज्ञानमेव केवलं साधनं नान्यदिति "तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः " इत्यादिश्रुतिस्मृत्यादिभिर्निश्चितमवगम्यते । क्रियात्मकानां कर्मोपासनानां तु चित्तशुद्धिचित्तैकाग्र्यसम्पादनेन ज्ञानोत्पत्तिद्वारा ब्रह्मावाप्तौ साधनता प्रतिपाद्यत इति " तत्प्राप्तिहेतुर्विज्ञान"मित्यादिपूर्वोक्तस्मृतेरर्थ इति ॥

॥ (२) ॥

ननु कर्मणां क्वोपयोग इति चेत्—

(१) अत्राहुर्भामतीकाराः—'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन'इति न्यायेन प्रत्ययार्थस्य प्राधान्यात् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादिश्रुतौ यज्ञादीनां विद्यासम्पादनद्वारा ब्रह्मप्राप्त्युपायभूतायां विविदिषायामुपयोग इति ॥

(२) विवरणानुसारिणस्तु—'इच्छेष्यमाणसमभिव्याहारे इष्य-

---

१ इच्छा च इष्यमाणं च तयोः समभिव्याहारे युगपत्कथने ।

माणस्यैव प्राधान्यम्, नत्विच्छायाः' इति विशेषन्यायेन इष्यमाणे प्रकृत्यर्थभूते ज्ञाने एव यज्ञादीनामुपयोग इति ॥

ननु—"तमेतमि"त्यादिश्रुत्युक्तविनियोगः केषां कर्मणाम्, किं सामान्येन सर्वेषां कर्मणाम्, उत आश्रमकर्मणामेवेति चेत्—

अत्राहुः केचित्—वेदानुवचन-यज्ञ-दान-तपआद्याश्रमत्रयधर्मप्रतिपादकश्रुतिभिः सर्वाश्रमकर्मणामेव विद्योपयोग इति ॥

कल्पतरुकारास्तु—"अन्तरा चापि तु तद्दृष्टेः" इत्यधिकरणोक्तरीत्या नाश्रमधर्माणामेव विद्योपयोगः, किन्तु विधुराद्यनुष्ठितकर्मणामपि । तत्रापि "विशेषानुग्रहश्च" इति सूत्रभाष्ययोस्तदनुष्ठितजपादिनित्यकर्मणामेव विद्योपयोगः स्पष्टमुक्तः । तत्फलस्य दुरितक्षयस्य विद्ययाऽपेक्षितत्वादिति ॥

सङ्क्षेपशारीरके तु—यज्ञादिशब्दानां नित्ययज्ञादिष्विव काम्ययज्ञादिष्वपि रूढत्वाविशेषात् नित्यानामिव काम्यानामपि श्रुत्या विनियोगो भातीति नित्यकाम्यसाधारण एवायं विनियोग इति ॥

॥ (३) ॥

ननु विविदिषाद्वारा विद्यायां विनियुक्तानां कर्मणां ब्राह्मणमात्राधिकारिकत्वं वक्तव्यं, न क्षत्रियादीनाम्, विविदिषावाक्ये ब्राह्मणपदमात्रस्य श्रवणादिति चेत्—

(१) अत्राहुः केचित्—विविदिषावाक्यस्थब्राह्मणपदस्य त्रैवर्णिकोपलक्षकत्वमेव युक्तम् ।

---

१ ब्रह्मसू. ३।४।३६। २ ब्रह्मसू. ३।४।३८।

" ब्राह्मणग्रहणं चात्र द्विजानामुपलक्षणम् ।
अविशिष्टाधिकारित्वात्सर्वेषामात्मबोधने ॥ " इति वार्तिकोक्तेरिति ॥

ननु—विद्यार्थकर्मसु शूद्रस्याप्यधिकारप्रसङ्गः, ब्राह्मणपदस्य विद्याधिकारिमात्रोपलक्षणत्वे शूद्रस्यापि विद्यायामर्थित्वरूपाधिकारिविशेषणसम्भवादिति चेत्—

(१) अत्राहुः केचित्—अपशूद्राधिकरणन्यायेन अध्ययनविधिना वेदजन्यवेदार्थज्ञानस्य वेदार्थानुष्ठाने नियमितत्वात् अध्ययनशून्यशूद्रस्य तदभावात् न सगुणनिर्गुणविद्यानुष्ठानेष्वधिकार इति तत्तुल्यतया विद्यार्थकर्मस्वप्यधिकारो नास्तीति ॥

(२) अन्ये तु—वेदानुवचनाग्निहोत्राद्यसम्भवेपि शूद्रस्य विद्यार्थकर्मसु स्ववर्णाश्रमोचितेषु स्मार्तपौराणिकागमिकेषु श्रीपञ्चाक्षरजपपाकयज्ञद्विजशुश्रूषानामकीर्तनतीर्थस्नानसत्याक्रोधशौचाचमनार्थपाणिपादप्रक्षालनश्राद्धकर्मभृत्यभरणस्वदारतुष्ट्यादिष्वधिकारस्मरणादस्त्येवाधिकारः। न च अपशूद्राधिकरण-'न शूद्राय मतिं दद्यात्' 'न शूद्रे पातकं किञ्चित्' इत्यादिश्रुतिस्मृतिन्यायविरोध इति वाच्यम् । तद्वचनानां सगुणनिर्गुणविद्यासाधनवेदान्तश्रवणादिष्वधिकारनिषेधपरत्वात्। किञ्च विषयसौन्दर्यप्रयुक्तार्थित्वस्य निषेद्धुमशक्यत्वेन तस्य शूद्रस्य, यद्यपि वेदान्तश्रवणाधिकाराभावः उक्तः तथापि भाष्यकारैरपशूद्राधिकरणोपसंहारे " श्रावयेच्चतुरोवर्णान् कृत्वा ब्राह्मणमग्रतः"। इत्यादिस्म-

---

१ 'तेषामात्मावबोधने' इति मुद्रितपुस्तकपाठः । २ बृहदा० वार्तिक० ४।४। १०२९। ३ ब्र. सू. १।३।३४ ।

रणात् ब्रह्मात्मैक्यपरपुराणादिश्रवणे विद्यासाधने अधिकारस्य दर्शितत्वेन च तस्य, तदर्थजपादिकर्मानुष्ठानं विद्योत्पत्तियोग्यविमलदेवशरीरनिष्पादनद्वारा मुक्त्यर्थं वा, वेदान्तश्रवणयोग्यत्रैवर्णिकशरीरनिष्पादनद्वारा विद्यार्थं वा भविष्यतीति ॥

॥ (४) ॥

ननु कर्मणां चित्तशुद्धिद्वारा विद्योपयोगः साधितः, अधुना संन्यासस्य विद्योपयोगः किं दृष्टद्वारा उतादृष्टद्वारेति चेत्—

(१) अत्राहुः केचित्—विद्योत्पत्तिप्रतिबन्धकदुरितानि द्विविधानि, यज्ञाद्यपूर्वनिवर्त्यानि संन्यासापूर्वनिवर्त्यानि चेति । तत्र संन्यासापूर्वमपि कर्मवत् चित्तशुद्धिद्वारैव विद्यायामुपयुज्यते । अत एव गृहस्थाद्यसन्न्यासिकृतवेदान्तश्रवणादि इह जन्मनि जन्मान्तरे वा संन्यासापूर्वनिवर्त्यदुरितक्षयद्वारैव विद्यां जनयेत्। संन्यासानधिकृतक्षत्रियादीनां तु पूर्वजन्मानुष्ठितसंन्यासमहिम्ना इह जन्मन्यपि विद्या जायेतेति॥

(२) अन्ये तु—"शान्तो दान्त उपरतः" सन्न्यासी "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्" तद्वतः—विद्यावतःसन्न्यासिनः—

"त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः ।
जिज्ञासोरेव चैकात्म्यं त्रय्यन्तेष्वधिकारिता॥"[1]

इत्यादिश्रुतिसूत्रवार्तिकोक्तिषु "उपरतः,तद्वतः, त्यक्ताशेषक्रियस्ये" तिशब्दगृहीतस्य सन्न्यासस्य साधनचतुष्टयान्तर्गतत्वेनाधिकारिविशेषणसमर्पकतया उक्तत्वादपूर्वद्वारैव विद्योपयोग इति ॥

---

१ ब्र. सू. ३।४।४७॥

(३) अपरे तु—'दृष्टद्वारे सम्भवत्यदृष्टकल्पनायोगादि'तिन्यायात् सन्यासस्य विक्षेपाभावरूपदृष्टद्वारा श्रवणाङ्गत्वेनात्मज्ञाने उपयोगः। अत एव इतराश्रमिणोपि सात्विकस्य विषयदोषदृष्ट्या जितेन्द्रियस्य कर्मच्छिद्रेषु वेदान्तश्रवणादिषु कदाचित् प्रवृत्तिः स्यादिति तन्निरासाय सन्यासिनैव श्रवणादि कर्तव्यमिति तत्र नियमविधिरभ्युपेय इति ॥

॥ (५) ॥

ननु "ब्राह्मणोनिर्वेदमायात्" "ब्राह्मणोव्युत्थाय" "ब्राह्मणःप्रव्रजेत्" इत्यादिश्रुतिषु ब्राह्मणपदग्रहणेन सन्यासस्य श्रवणाद्यङ्गत्वेन विधौ ब्राह्मणमात्राधिकारिकत्वप्रतीतेः तद्रहितयोः क्षत्रियवैश्ययोः कथं वेदान्तश्रवणाद्यनुष्ठानमिति चेत्—

(१) अत्राहुः केचित्—"यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा"इत्यादिसाधारणश्रुत्या, तदर्थानुवादिन्या

"ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहात् ।
त्रयाणामपि वर्णानाममी चत्वार आश्रमाः" ॥ इत्यादिस्मृत्या
"त्रयाणामविशेषेण सन्यासः श्रूयते श्रुतौ ।
यदोपलक्षणार्थं स्याद्ब्राह्मणग्रहणं तदा" ॥

इत्यादिवार्तिकवचनेन च क्षत्रियवैश्ययोरपि सन्यासाधिकारस्य सिद्धत्वेन श्रुत्यन्तरेषु ब्राह्मणग्रहणं त्रयाणामुपलक्षणार्थमिति ॥

(२) अन्ये तु—सर्वेषु सन्यासविधायकश्रुतिवाक्येषु ब्राह्मणग्रहणात् "यदिवेतरथा" इत्यादिजाबालश्रुतौ ब्राह्मणपदाभावेपि "ब्राह्मणो व्युत्थाये" त्यादिबहुश्रुत्यन्तरसिद्धब्राह्मणाधिकारिकत्वमेव सन्यासस्य वक्तव्यम्। स्मृतिवचनं तु [1]विरोधाधिकरणन्यायेन श्रुतिविरुद्धत्वात् न

१ प्रत्यक्षश्रुतिविरुद्धं स्मृतिवचनमप्रमाणम् इति ।

आदर्तव्यमेव ॥ अथवा

"सर्वाधिकारविच्छेदि ज्ञानं चेदभ्युपेयते ।
कुतोऽधिकारनियमो व्युत्थाने क्रियते बलात् ॥"[1]

इति वार्तिकवचनेन ब्रह्मापरोक्षज्ञानोदयानन्तरं जीवन्मुक्तिदशायां सर्वाधिकारविच्छेदे सर्वेषां विद्वत्सन्न्यासे एवाधिकारप्रदर्शनपरमिति ॥ एवंच विविदिषापक्षे ब्राह्मणानामेव श्रवणाद्यङ्गत्वेन सन्न्यासविधानम्, नेतरयोः । तयोस्तन्निरपेक्षमेव श्रवणाद्यधिकारो देववदिति ॥

(३) अपरे तु—"ब्रह्मसंस्थोऽमृतत्वमेति" इत्यादिश्रुतौ,

"गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोपि वा ।
न विचारपरं चेतो यस्यासौ मृत उच्यते ॥
आमुक्तेरामृतेः कालं नयेद्वेदान्तचिन्तया ।
दद्यान्नावसरं किंचित्कामादीनां मनागपि ॥
त्वम्पदार्थविवेकाय सन्न्यासः सर्वकर्मणाम् ।
श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत्" ॥

इत्यादिस्मृतिषु च सर्वदाऽमृतत्वकामस्य ब्रह्मण्यनन्यव्यापारतया विचारविधानात्, तस्य च सन्न्यासं विनाऽसम्भवात्, सन्न्यासिन एव श्रवणे मुख्याधिकारः । तथा देवानामनुष्ठेयकर्माभावेन तत्सन्न्यासाभावेपि मुख्याधिकार एव । इतरयोः शूद्रवत्प्रतिषेधाभावाद्बिधुरादीनामिव वेदान्तश्रवणेऽमुख्योऽधिकारः सन्न्यासाभावात्, स्वस्वाश्रमकर्मानुष्ठान एव तस्य मुख्यत्वाच्च जन्मान्तरे तस्य श्रवणस्य विद्याजनकत्वमिति ॥

---

१ बृहदा० वार्तिक. ३।२।९० । तत्र मुद्रितपुस्तके "कर्माधिकारविच्छेदि' इति पाठः ।

॥ (६) ।

ननु अमुख्याधिकारिकृतवेदान्तविचारस्य जन्मान्तरे विद्याजनकत्वं न सङ्गच्छते दृष्टफलभूतवाक्यार्थावगत्यर्थत्वाद्विचारस्येति चेत्—

(१) अत्राहुः केचित्—अमुख्याधिकारिणापि विविदिषुणा क्रियमाणं वेदान्तश्रवणं विविदिषोत्पादकयज्ञाद्यनुष्ठानजन्यापूर्वद्वारा जन्मान्तरीयायामपि विद्यायामुपकारं करोतीति ॥

श्रवणादौ विध्यभावपक्षे सन्न्यासिना क्रियमाणस्यापि श्रवणस्यैहिकविद्याजननेऽदृष्टानपेक्षत्वेपि प्रतिबन्धे सति जन्मान्तरे तस्य विद्याजननेऽदृष्टमेव द्वारमेष्टव्यमिति ॥

(२) [1]आचार्यास्तु—नियमविधिपक्षेऽपि यावद्ब्रह्मज्ञानोदयमावर्त्यमानमेव श्रवणं नियमादृष्टं जनयति, न तु फलपर्यन्तश्रवणावृत्तेः प्राक्, इत्यस्मिन्पक्षेपि पूर्वोक्तनियमादृष्टकल्पनाप्रकारेणैव निर्वाहः कर्तव्य इति ॥

(३) अपरे तु—दृष्टार्थस्यैव श्रवणस्य

"दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् ।
गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेत् ॥"

इत्यादिवचनप्रामाण्यात् स्वतन्त्रादृष्टोत्पादकत्वमप्यस्तीति श्रवणादृष्टमहिम्नैवामुष्मिकविद्योपयोगित्वमिति ॥

---

१. वाचस्पतिमते । २. विवरणाचार्याः ।

॥ (७) ॥

ननु—पूर्वोक्तसाङ्ख्यमार्गे श्रवणादावशक्तस्य मन्दाधिकारिणो मुमुक्षोर्विद्यावासौ क उपाय इति चेत्—

अत्राहुर्भारतीतीर्थाः—"तत्कारणं साङ्ख्ययोगाभिपन्नम्" । "यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥" इत्यादिश्रुतिस्मृतिप्रामाण्यात् साङ्ख्यानां विद्यावासौ मननिदिध्यासनसहकृतश्रवणात्मकवेदान्तविचार इव मन्दानां योगशब्दितं निर्विकल्पकब्रह्मध्यानमपि आनन्दादिभिरस्थूलादिभिश्चोपलक्षितमखण्डैकरसमद्वितीयं ब्रह्माहमस्मीत्येवम्भूतं अविसंवादि[1]भ्रमन्यायेन ब्रह्मसाक्षात्कारे कारणम् ॥ अयमत्र विशेषः—बुद्धिमान्द्यादिप्रतिबन्धकाभावे पुरुषधौरेयस्य श्रवणादिना ब्रह्मसाक्षात्कारो झटिति सिद्ध्यतीति साङ्ख्यो मार्गो मुख्यः कल्पः । मन्दानां तु केवलनिर्गुणोपास्त्या विलम्बेन सिध्यतीति योगमार्गोऽनुकल्प इति ॥

॥ (८) ॥

ननु अस्मिन्साङ्ख्ययोगपक्षद्वयेपि ब्रह्मसाक्षात्कारफले किं करणमिति चेत्—

(१) अत्राहुः केचित्—योगमार्गे प्रत्ययाभ्यासरूपप्रसङ्ख्यानस्य, साङ्ख्यमार्गे निदिध्यासनरूपप्रसङ्ख्यानस्य च करणत्वं "ततस्तु तं पश्यते निष्कलं ध्यायमानः" "ध्यानेनात्मनि पश्यन्ति केचिदात्मा-

---

१. विसंवादः फलाभावः, तद्रहितोऽविसंवादिभ्रमः । फलवद्भ्रम इति यावत् ॥

नमात्मना" इत्यादिश्रुतिस्मृतिभिः सिद्धम् ॥ न च प्रसङ्ख्यानस्य प्रमाणकोट्यप्रविष्टत्वात्तज्जन्यब्रह्मसाक्षात्कारोऽपि प्रमा न भवेदिति शङ्क्यम्, क्लृप्तप्रमाणाजन्यत्वेपि ईश्वरीयमायावृत्तिवत् प्रमात्वोपपत्तेः । प्रसङ्ख्यानस्य च करणत्वं कामातुरस्य व्यवहितकामिनीसाक्षात्कारे क्लृप्तमिति च लोके प्रसिद्धमिति ॥

(२) अन्ये तु—"एषोऽणुरात्मा चेतसा वेदितव्यः" "दृश्यते त्वग्र्यया बुद्ध्या" इत्यादिश्रुत्या मन एव प्रसङ्ख्यानसहकृतं ब्रह्मसाक्षात्कारे करणम् । मनसः करणत्वं "अहमेवेदं सर्वोस्मीति मन्यते सोऽस्य परमो लोक" इति श्रुत्या स्वप्ने ब्रह्मसाक्षात्काराय बोधितम्, तदा करणान्तराभावात् । तद्वदिहापि ॥ कामातुरकामिनीसाक्षात्कारादावपि प्रसङ्ख्यानसहकृतं मन एव करणमिति दृष्टमिति ॥

(३) अपरे तु—"तद्धास्य विजज्ञौ" "तमसः पारं दर्शयति" "आचार्यवान्पुरुषो वेद" "वेदान्तविज्ञानसुनिश्चितार्थाः" "तन्त्वौपनिषदम्पुरुषम्" इत्यादिश्रुतिषु ब्रह्मण उपनिषदेकसमधिगम्यत्वश्रवणात् योगमार्गेण साङ्ख्यमार्गेण वा दृष्टादृष्टलक्षणसकलप्रतिबन्धक्षये सति अप्रतिबद्धं सदौपनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे करणम्, न मनः, "यन्मनसा न मनुत" इत्यादिनिषेधश्रवणादिति ॥

॥ (९) ॥

ननु परोक्षज्ञानजनकत्वस्वभावस्य शब्दस्य महावाक्यस्य कथमपरोक्षब्रह्मज्ञानजनकत्वमिति चेत्—

(१) अत्राहुः केचित्—स्वतोऽसमर्थोपि शब्दः श्रवणमनन-

निदिध्यासनजनितसंस्कारलब्धब्रह्मैकाग्र्यवंचित्तानुगृहीतः सन्नपरोक्षमपि ज्ञानं जनयत्येव । "तरति शोकमात्मविदि"ति श्रुतौ शोकोपलक्षितकर्तृत्वाद्यध्यासस्य अपरोक्षस्याअपरोक्षात्मज्ञाननिवर्त्यत्वप्रतिपादनात्, अन्यथा तस्य च परोक्षस्य अपरोक्षभ्रमनिवर्तकत्वायोगात् । औपनिषद्ब्रह्मणि वेदेतरप्रमाणासम्भवात्, "वेदान्तविज्ञानसुनिश्चितार्थाः" "परामृताः परिमुच्यन्ति सर्वे" "विद्वान्नामरूपाद्विमुक्तः" "परम्ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतिषु ज्ञानादेव कैवल्यश्रवणाच्च शब्दस्य अपरोक्षज्ञानकरणत्वं शास्त्रप्रामाण्यात्स्वीकर्तव्यमिति ॥

(२) अन्ये तु—बहिरसमर्थस्यापि मनसो ध्यानाभ्याससाहाय्यात् नष्टवनितासाक्षात्कारजनकत्वं दृष्टमिति निदिध्यासनसहकृतशब्दस्यापि अपरोक्षज्ञानजनकत्वं युक्तमेवेति ॥

(३) अपरे तु—अपरोक्षार्थविषयकत्वं ज्ञानस्यापरोक्षत्वम् । न त्विन्द्रियजन्यज्ञानत्वादि । अर्थापरोक्ष्यं च—[स्वव्यवहारानुकूलचैतन्याभिन्नत्वम्] तत्तत्प्रमातृचैतन्याभिन्नत्वम् । न तु अपरोक्षज्ञानविषयत्वम् । अतो नान्योन्याश्रयः । एवं च "यत्साक्षादपरोक्षाद्ब्रह्मे"ति श्रुत्या स्वत एव नित्यापरोक्षरूपत्वात्, "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादि श्रुत्या सर्वदा सर्वपुरुषचैतन्यरूपत्वेन तदभिन्नत्वाच्च ब्रह्मणः तद्विषयकस्य शाब्दस्यापि ब्रह्मज्ञानस्यापरोक्षत्वं युक्तमेवेति ॥

(४) अद्वैतविद्याचार्यास्तु—तत्तदर्थाभिन्नत्वे सति तत्तदर्थव्यव-

---

१. ०काम्ययुक्तचित्ता० इत्यर्थः ।

हारानुकूलज्ञानत्वं ज्ञानापरोक्ष्यम् । स च चैतन्यस्यैव धर्मः, नान्तःकरणवृत्तिधर्मः । अर्थापरोक्ष्यं तु--स्वव्यवहारानुकूलचैतन्याभिन्नत्वम् । एवं च अन्तःकरणतद्धर्माणामापरोक्ष्यं च स्वव्यवहारानुकूलसाक्षिचैतन्याभिन्नत्वम्, तेषां तत्राध्यस्तत्वात् । बहिर्घटादीनामापरोक्ष्यं च स्वव्यवहारानुकूलाधिष्ठानचैतन्याभिन्नत्वम् । ब्रह्मणश्चापारोक्ष्यं स्वव्यवहारानुकूलवृत्त्युपहितसाक्षिचैतन्याभिन्नत्वम् ॥ चैतन्यरूपज्ञानस्य तत्तदर्थव्यवहारानुकूलत्वे सति तत्तदर्थाधिष्ठानत्वात्तदभिन्नत्वमिति ॥

॥ (१०) ॥

ननु वेदान्तजन्यब्रह्मज्ञानेनेव घटादिचाक्षुषादिज्ञानेनापि मूलाज्ञाननिवृत्तिर्भवेदेव, घटः सन्नित्यादिबुद्धिवृत्तेरपि तत्रावच्छेदकांशस्य कल्पितत्वेपि अकल्पितमूलाज्ञानविषयशुद्धचैतन्यविषयकत्वाविशेषादिति चेत्—

(१) अत्राहुराचार्यवाचस्पतिमिश्राः—"तं त्वौपनिषदं पुरुषं पृच्छामि" "वेदान्तविज्ञानसुनिश्चितार्थाः" "नावेदविन्मनुते तं बृहन्तं" इत्यादिश्रुतिभिर्ब्रह्मणो वेदान्तैकसमधिगम्यत्वश्रवणात्, "न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्" "पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्" इत्यादिश्रुतिभिः प्रत्यक्षादिप्रमाणान्तरावेद्यत्वश्रवणाच्च न चक्षुरादीन्द्रियजन्यवृत्तिविषयत्वं ब्रह्मणः सम्भवति । किं च मूलाज्ञानतत्कार्यानुपहितकेवलनिष्प्रपञ्चशुद्धाद्वितीयचिन्मात्रविषयकत्वान्मूलाज्ञानस्य तादृशविषयकज्ञान-

१. स्वगोचरवृत्त्युप० ।

स्यैव मूलाज्ञाननिवर्तकत्वं सम्भवति । तदभावाच्च घटादिज्ञानानां न तन्निवर्तकत्वम् । ज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावे समानविषयकत्वस्यैव तन्त्रत्वादिति ॥

अथ वा—घटादिज्ञानानां चैतन्यं नैव विषयः, किं तु जडमेव; घटादिज्ञाननिवर्त्यावस्थाऽज्ञानानां जडमात्रविषयकत्वात् । जडे आवरणकृत्याभावत्वाज्ञानैकत्वादीनां मूलाज्ञानविषयत्वाच्चादोष इति ॥

(२) केचित्तु—ज्ञानाज्ञानयोश्चैतन्याश्रितत्वनियमेनाज्ञानमात्रस्य तमस इव स्वाश्रयादन्यत्रावरणहेतुत्वानुपपत्तेः घटाद्यवस्थाऽज्ञाननिवर्तकचाक्षुषादिज्ञानानां तत्तद्विषयावच्छिन्नचैतन्यमेव विषयः, न जडमात्रम् । न च तर्हि घटादिज्ञानानां ब्रह्मविषयकत्वान्मूलाज्ञाननिवर्तकत्वापत्तिरिति वाच्यम् । घटादिज्ञानानां चैतन्यविषयकत्वेप्यवच्छिन्नविषयकत्वात्, केवलनिष्प्रपञ्चाद्वितीयशुद्धचिन्मात्रगोचरवेदान्तैकप्रमाणजन्यत्वाभावेन श्रोतव्यविधिसिद्धश्रवणनियमादृष्टसहिताप्रतिबद्धब्रह्मज्ञानत्वाभावाच्चेति ॥

(३) अन्ये तु—तत्त्वमस्यादिवेदान्तमहावाक्यजन्यजीवब्रह्माभेदविषयकज्ञानमेव तादृशमूलाज्ञाननिवर्तकम्, तस्यैव[1] जीवब्रह्माभेदावारकत्वात्, न तु चैतन्यमात्रविषयकघटादिज्ञानम् । तथा च घटादिज्ञानस्य महावाक्यजन्यज्ञानस्य च समानविषयकत्वेन चैतन्यांशे विषयतो विशेषाभावेपि कारणसामग्रीविशेषादेव घटादिज्ञानापेक्षया महावाक्यजन्याभेदज्ञानस्य वैलक्षण्यं बोध्यम् । अभेदज्ञानत्वं च न

---

१ मूलाज्ञानस्यैव ।

केवलमभेदमात्रविषयकज्ञानत्वम् । किं तु वाक्यजन्यज्ञानस्य स्वविषयचैतन्येन सह सामग्रीविशेषाधीनत्वप्रयुक्तस्वरूपसम्बन्धविशेषेण चैतन्यगोचरत्वं घटादिज्ञानव्यावृत्तमिति ॥

(॥ ११ ॥)

ननु—घटादिज्ञानवत् ब्रह्मज्ञानमपि स्वोपादानमूलाज्ञानबाधकं न भवति लोके कार्यस्य स्वोपादानस्थितिविरोधित्वादर्शनादिति चेत्—

(१) अत्राहुः केचित्—उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोजकविरोधाभावस्योत्सर्गतः क्वचिद्दृष्टत्वेपि अन्यत्र निवर्त्यनिवर्तकभावप्रयोजकत्वेन घटादिज्ञानाज्ञानयोः कृत्स्नस्य समानविषयकत्वस्य विशेषरूपतया, तस्य च ब्रह्माज्ञानतज्ज्ञानयोः सत्त्वात्, तेन च सामान्यरूपोपादानोपादेयभावप्रयुक्ताविरोधस्य बाधात्, कार्यकारणयोरपि वेणुतज्जवह्न्योः पटाग्निसंयोगयोर्निवर्त्यनिवर्तकभावस्य दृष्टत्वाच्च, अस्त्येव ब्रह्मज्ञानेन स्वोपादानमूलाज्ञानस्य बाध इति ॥

॥ (१२) ॥

ननु—एवमपि सविलासमूलाज्ञाननिवर्तकचरमसाक्षात्कारस्य निवर्तकान्तराभावात्कथं निवृत्तिः ? कथञ्चिन्निवर्तकान्तरकल्पनायामप्यनवस्थापातात्, स्वेनैव निवृत्त्ययोगात्, अनिवृत्तौ द्वैतापत्तेश्चेति चेत्—

(१) अत्राहुः केचित्—नैवात्र क्रमो विवक्षितः प्रथमं ब्रह्मज्ञानेन स्वेतरस्य सकलस्य नाशः पश्चात्स्वस्येति । किन्तर्हि । ब्रह्मज्ञान-

---

१ क्रमप्रतिपत्तिरूपकारणसामग्री । २. तादृग्विरोधस्य अथवा समानविषयकत्वस्य ।

स्यापि स्वेनैव ब्रह्मात्मन्यध्यस्तसविलासमूलाज्ञानेन सहैव नाशोऽभ्युपगम्यते। न हि स्वस्वेतरविनाशकत्वमेकस्य दृष्टमिति वाच्यम्। कतकरजसि पङ्किलजलस्थरजोनिवृत्त्या सहैव स्वनिवृत्तेरपि दृष्टत्वादिति ॥

(२) अन्ये तु—प्रतप्तायःपिण्डे निक्षिप्तं जलं यथा वह्निं विनाशयत्स्वयमपि तत्क्षणाद्विनश्यति, तथा ब्रह्मज्ञानमपि स्वेतरनिखिलं दृश्यं निवर्तयत्स्वयमपि नश्यतीति दृष्टान्तान्तरमुदाहरन्ति ॥

(३) अपरे तु—यथा शुष्कतृणतूलादिपुञ्जनिक्षिप्तो वह्निस्तृणादिपुञ्जं नाशयित्वा स्वयमपि नश्यति, तथा सविलासमूलाज्ञानं निर्लेपं विनाशयदात्मज्ञानं स्वयमपि नश्यतीत्ययमेको दृष्टान्तः ॥ ननु—ब्रह्मज्ञानं कारणान्तरमनपेक्ष्य स्वयमेव नश्यतीत्यनुपपन्नम्, घटादिनाशे प्रतियोग्यतिरिक्तमुद्गरपातादिकारणान्तरदर्शनादितिचेन्न-उभयथाप्युपपत्तेः। दग्धतृणकूटदहनवत् कारणान्तरमनपेक्ष्य, कालादृष्टेश्वरेच्छादीनां नाशपूर्वभावितया कारणभावमपेक्ष्य चेति ॥ न चैवं ज्ञानातिरिक्तकारणापेक्षायां ज्ञानैकनिवर्त्यत्वं मिथ्यात्वमिति मिथ्यालक्षणस्य हानिरिति वाच्यम्। ज्ञानाघटितसामग्र्यनिवर्त्यत्वे सति ज्ञाननिवर्त्यत्वस्य तदर्थत्वात्। "नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतेरपि ज्ञानमेकमेव मोक्षसाधनमिति तात्पर्यं न विवक्षितम्, किन्तु ज्ञानाघटितं किमपि साधनं न भवतीत्येवेति ॥

(४) एके तु—यथा तमस्तमोन्तरं न निवर्तयति, एवं चरमसाक्षात्कारोऽपि जडत्वाविशेषात्सविलासमूलाज्ञानं न शक्नोति निवर्तयितुम्, किन्तु चैतन्यमेव प्रकाशरूपत्वाच्छक्नोति निवर्तयितुम्। तस्यापि

स्वरूपेणाज्ञानादिसाक्षितया साधकत्वेपि अखण्डाकारवृत्त्युपहिततया बाधकत्वसम्भवात् । यथा तृणादेः साधकमपि सवितृकिरणं सूर्यकान्तोपलारूढं सत् दाहकं भवति, यथा वा काष्ठाश्रिताग्निज्वालापि स्वाश्रयकाष्ठादेः, तद्वदिति ॥

(५) इतरे तु—विरोधप्रयोजकस्य समानविषयकत्वादज्ञानाज्ञानयोरेव सत्वान्मूलाज्ञानस्यैव ब्रह्मज्ञानं साक्षान्निवर्तकम् । प्रपञ्चरूपतत्कार्यस्य तु स्वोपादानमूलाज्ञाननिवृत्तिद्वारा । अस्मिन्पक्षे साक्षात्परम्परया वा ज्ञानैकनिवर्त्यत्वं मिथ्यात्वमित्यङ्गीकारात् प्रपञ्चेपि तत्सिद्ध्यति । प्रपञ्चान्तर्गतब्रह्मविषयकचरमसाक्षात्कारस्यापि मूलाज्ञाननिवृत्त्यैव निवृत्तिः । तथा च विदुषो देहादिप्रपञ्चस्यापि साक्षाज्ज्ञानेन सह विरोधाभावात् प्रारब्धकर्मप्रतिबन्धेनाविद्यालेशानुवृत्त्या जीवन्मुक्तिशास्त्रस्याप्यवकाश एवं सत्येव भवतीत्याहुरिति शिवम् ॥

इति श्रीवासुदेवब्रह्मेन्द्रसरस्वतीविरचिते सिद्धान्तलेशतात्पर्यसङ्ग्रहे
तृतीयपरिच्छेदः सम्पूर्णः ॥

ॐ

॥ अथ चतुर्थपरिच्छेदः ॥

॥ (१) ॥

ननु निरवयवाया अप्यविद्यायाः कोयमविद्यालेशो नाम, यमाश्रित्य लोके जीवन्मुक्तिव्यवहार इति चेत्—

(१) अत्राहुः केचित्—आवरणविक्षेपशक्तिद्वयविशिष्टाया अविद्याया आत्मसाक्षात्कारेणावरणशक्तेर्नाशेपि, प्रारब्धकर्मरूपप्रतिबन्धनाशावधि अनुवृत्ता विक्षेपशक्तिरेव लेश इत्युपचर्यत इति ॥

(२) अन्ये तु—तत्त्वज्ञानेनाविद्यानाशेपि क्षालितलशुनभाण्डगन्धवदविद्याजन्या देहादिस्थितिहेतुर्वासनैव लेशशब्दार्थ इति ॥

(३) अपरे तु—दग्धपटन्यायात् तत्त्वज्ञानेन नष्टार्थक्रियाकारिणी अविद्यैवाविद्यालेश इति ॥

(४) सर्वज्ञात्मगुरवस्तु—प्रचण्डमार्तण्डप्रभाविनष्टान्धकारवत् कृतनिदिध्यासनस्यानन्यचित्ततयाऽनवरतं ब्रह्मणि निष्प्रपञ्चे प्रत्यगात्मनि निष्ठस्य अप्रतिबद्धापरोक्षब्रह्मसाक्षात्कारोदयमात्रेण निःशेषं सविलाससवासनाद्यविद्यानिवृत्तेरविद्यालेशानुवृत्तिवार्तैवानुपपन्ना । "तस्य तावदेव चिरं" इत्यादिप्रारब्धकर्मानुवृत्त्या जीवन्मुक्तिप्रतिपादकशास्त्रं तु श्रवणादिविधिस्तावकार्थवादमात्रमिति ॥

॥ (२) ॥

ननु तत्त्वसाक्षात्कारफलभूताविद्याध्वंसः किमधिष्ठानचिन्मात्ररूपः, उत तद्भिन्न इति सन्देहे—

(१) अत्राहुर्ब्रह्मसिद्धिकाराः—अधिष्ठानचैतन्यरूपैवाविद्यानिवृत्तिः । न च तर्हि नित्यसिद्धत्वात्तस्य ज्ञानसाध्यत्वासम्भवः । द्विविधं हि साध्यलक्षणम्, सादिपदार्थत्वावच्छिन्नसाधारणं जन्यत्वरूपमेकम्, अपरं तु साद्यनाद्युभयसाधारणम् । यस्मिन्सत्यग्निमक्षणे यस्य सत्त्वं यद्व्यतिरेके चाभावः, तत् तत्साध्यमिति । अत्र च प्रथमलक्षणासम्भवात् द्वितीयमेव गृह्यते । तेन अविद्यानिवृत्तेश्चैतन्यसत्त्वरूपस्यात्मनो ज्ञानसाध्यत्वमुपपन्नम् । तथाहि प्रायश्चित्ते सत्यग्निमक्षणे दुःखप्रागभावस्य सत्त्वम्, प्रायश्चित्ताभावे तु दुःखस्यैवोदयाद्दुःखप्रागभावाभाव इति, दुःखप्रागभावस्यानादेरपि प्रायश्चित्तसाध्यत्वं यथा, तथा यस्मिन्ब्रह्मज्ञाने सत्यग्निमक्षणे आत्मरूपाविद्यानिवृत्तिसत्त्वम्—तद्व्यतिरेके तदभावः, भ्रान्तिसिद्धः कश्चिच्चैतन्यरूपाविद्यानिवृत्त्यभाव इति ॥

(२) आनन्दबोधाचार्यास्तु—अविद्यानिवृत्तिरात्मरूपा न भवति, किन्तु तद्भिन्नैव । तथापि सा न सती, द्वैतापत्तेः । ज्ञानवैय्यर्थ्यान्नाप्यसती । विरोधान्न सदसती च । नाप्यनिर्वाच्या । अनाद्यविद्यातिरिक्तसाद्यनिर्वाच्याविद्यानिवृत्त्यभ्युपगमे, तस्या अज्ञानोपादानकत्वनियमेनानिर्मोक्षप्रसङ्गात् । वस्तुतस्तु—उक्तप्रकारचतुष्टयविलक्षणपञ्चमप्रकारेति ॥

(३) अद्वैतविद्याचार्यास्तु—अविद्यानिवृत्तिरपि स्वकारणाविद्यावदनिर्वाच्यैव । न चोपादानाविद्यानुवृत्त्याऽनिर्मोक्षप्रसङ्ग इति वाच्यम् । तस्या निवृत्तेः क्षणिकभावविकारत्वोपगमेन स्वतो नाशात् ।

---

१. सादि–अनिर्वाच्य०

यथा हि लोके घटादिपदार्थानामुत्पत्तिर्नाम षड्भावविकारेष्वाद्यक्षणमात्रसंसर्गी कश्चन भावरूपो विकार उपेयते, न त्वभावरूपः; तथा निवृत्तिरूपनाशोपि चरमसमयमात्रसंसर्गी कश्चिद्भावरूप एव विकार एष्टव्यः, न त्वभावरूपः। एवञ्चाविद्यानिवृत्तेरपि तत्त्वज्ञानोदयानन्तरचरमसमयमात्रवर्तिभावविकारत्वोपगमान्नानिर्वाच्यत्वेऽनिर्मोक्षप्रसङ्ग इति॥

॥ (३) ॥

ननु अविद्यानिवृत्तेः क्षणिकत्वे कथं मोक्षः स्थिरपुरुषार्थो भवेदिति चेत्—

(१) अत्राहुः केचित्—सुखस्य सुखसाधनस्य वा, दुःखाभावस्य दुःखाभावसाधनस्य वा पुरुषार्थत्वेन अखण्डानन्दस्वप्रकाशसत्स्वरूपावारकसंसारदुःखहेत्वविद्यानिवृत्तेः सुखेतरत्वात् दुःखाभावेतरत्वाच्च साक्षादपुरुषार्थत्वेपि ज्ञानसाध्यत्वेन पुरुषार्थसाधनतया पुरुषार्थत्वमुपचर्यते। अविद्योच्छेदानन्तरमेवाखण्डानन्दस्फुरणस्य संसारदुःखोच्छेदस्य च दर्शनादिति॥

(२) चित्सुखाचार्यास्तु—निरतिशयस्वरूपसुखमेव स्वतः पुरुषार्थः, नाविद्यानिवृत्तिवद्दुःखाभावः। तस्य केवलात्मसुखानुभवकाले दुःखस्य प्रतिबन्धकत्वेन तदभावविधया परम्परया पुरुषार्थत्वात्। किं च सुखदुःखाभावयोः प्रवृत्तिमात्रम्प्रत्यनुगतकारणे इष्टसाधनताज्ञाने इष्टांशे सुखत्वजातेः प्रवेशकल्पने कारणतावच्छेदकलाघवात्, इच्छाविषयत्वरूपोपाधेः प्रवेशकल्पने तु कारणतावच्छेदकगौरवाच्च। न च दुःखाभावरूपपुरुषार्थशेषतया सुखस्यैव काम्यत्वं वैपरीत्येन किन्न

स्यादिति वाच्यम् । लोके हि क्षणिकग्राम्यसुखमुद्दिश्य दीर्घकालदुःखानुभवस्य क्लेशार्जितबह्वर्थादिव्ययस्य च दर्शनादित्याहुः ॥

॥ (४) ॥

ननु निरतिशयब्रह्मानन्दस्यैव मुक्तिरूपत्वेन तस्य च वेदान्तमहावाक्यैः प्रत्यगात्मस्वरूपतया प्रतिपादनात् कथं नित्यप्राप्तेप्यानन्देतदर्थं साधनानुष्ठानप्रवृत्तिरिति चेत्—

(१) अत्राहुः केचित्—नित्यप्राप्तेऽप्यर्थेऽप्राप्तत्वभ्रान्त्या तत्प्राप्त्यर्थं तदुचितोपायेषु प्रवृत्तेर्लोके दृष्टत्वात् । यथा स्वकण्ठगतमेव कनकाभरणं भ्रान्त्याऽप्राप्तमपि परोपदेशेन प्राप्तमिव भवति, तद्वत्स्वरूपानन्दोप्यविद्ययाऽप्राप्तः सन्नकृतार्थतामजनयत् । प्राचीनसुकृतवशाद्गुरुवेदान्तमहावाक्यैरुदितायां विद्यायां निवर्तितायामविद्यायां निवर्तिते च निखिलानर्थविक्षेपे प्राप्तः सन् कृतकृत्यतां जनयति । तत्प्राप्तिश्चौपचारिक्येवेति ॥

(२) अन्ये तु—आनन्दो मयि नास्ति न प्रकाशत इति लोकव्यवहारसिद्धोऽविद्यास्थितिकः काल्पनिकः कश्चिद्ब्रह्मानन्दस्याभावोऽङ्गीकर्तव्यः; अविद्यानिवृतौ च तन्मूलकानन्दाभावोपि निवर्तत इति 'यस्मिन्सत्यग्रिमक्षण' इति न्यायेन मुख्यमेव तत्प्राप्यत्वमिति ॥

(३) अपरे तु—सत्तामात्रेण नाखण्डब्रह्मसुखं पुरुषार्थः, अवे-

---

१. भ्रान्त्याऽप्राप्तमिव परोपदेशेन प्राप्तमिव च भवति—इति पाठान्तरं ।
२ ज्ञाते सति अग्रिमक्षणे निरतिशयानंदसत्त्वं, ज्ञानाभावे च साधितस्य निरतिशयानन्दाभावस्यैव सत्त्वमिति ।

द्यत्वात् । किन्त्वपरोक्षब्रह्मविज्ञानेनाविद्यानिवृत्तौ सत्यामेव प्राप्यस्य अनावृतचैतन्याभिन्नाखण्डस्वरूपानन्दस्यैव पुरुषार्थत्वमिति ॥

(४) इतरे तु—यथा वस्तुतोऽभेदेपि जीवानामाविद्यकभेदान्नान्योन्यसुखाद्यापरोक्ष्यं, एवं चिदानन्दयोः सत्वेपि वास्तवाभेदे काल्पनिकभेदान्नानन्दापरोक्ष्यम् । ज्ञानेन भेदप्रविलये त्वपरोक्षत्वप्रयोजककेवलचैतन्याभेदसत्वादानन्दावाप्तिः । तदापरोक्ष्यमेव तस्य विद्यासाध्यत्वमिति ॥

॥ (५) ॥

ननु मुक्तिदशायां विद्याविध्वंसिताविद्याद्यखिलोपाधिकस्य जीवस्य किमीश्वररूपेणावस्थानम्, उत निर्विशेषशुद्धचिन्मात्रात्मनावस्थितिर्भवतीति विवित्सायाम्—

(१) अत्राहु केचित्—एकजीववादे जीवस्यैकत्वात् तदीयमूलाज्ञानरूपोपाधेरप्येकत्वेन यदा अद्वितीयशुद्धचिन्मात्रस्वतत्वसाक्षात्कारोदयः, तदानीमेव देवतिर्यङ्मनुष्यादिभूतभौतिकनिखिलदृश्यप्रपञ्चोपादानाज्ञानस्य निःशेषं प्रविलयाच्छुद्धनिर्विशेषचैतन्यात्मनाऽवस्थानं सिद्ध्यति । शुकादिमुक्तिप्रतिपादकशास्त्रं[1] तु स्वार्थेऽप्रामाण्याच्छ्रवणादिविद्ध्यर्थवाद इति । अयं च पक्षोऽत्यन्तोत्तमाधिकारिण एव परममुक्तिसाधनत्वेन रोचेतेति ॥

(२) अपरे तु—अनेकजीववादे मायाप्रतिबिम्ब ईश्वरः अविद्याप्रतिबिम्बा जीवा इत्यस्मिन्पक्षे, एकस्य जीवस्य तत्त्वज्ञानेन स्वा-

१. ०शास्त्रं तु० इति पाठान्तरं ।

विद्यातत्कार्यप्रपञ्चप्रविलयाद्बिम्बभूतशुद्धचैतन्यात्मना मुक्ताववस्थितस्यापि यावत्सर्वमुक्तिर्भविष्यति तावद्बुद्धजीवान्तराविद्याकृतबिम्बत्वजीवेश्वरविभागादिप्रपञ्चोऽनुवर्तत एवेति ॥

(३) इतरे तु—अनेकजीववाद एव मायायां अविद्यायां अन्तःकरणे वा चित्प्रतिबिम्बो जीवः, बिम्बस्थानीय ईश्वरः, तदुभयानुगतं शुद्धचैतन्यमित्यस्मिन्पक्षे तु, एकस्य जीवस्य ज्ञानोदयेपि जीवेश्वरविभागाद्यस्पृष्टनिर्विशेषब्रह्मभावरूपमुक्तिर्न सिद्ध्यति । किं तु, यावत्सर्वमुक्ति सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसर्वकामत्वादिगुणकबिम्बभूतपरमेश्वरभावापत्तिरेवेप्यते । न च मुक्तस्य ईश्वरत्वप्रयोजकाविद्यायाः ज्ञानेन दग्धत्वात्कथमीश्वरभावापत्तिरिति शङ्क्यम् । स्वाविद्याभावेऽपि बहुजीवान्तराविद्यायाः तदानीमनपायात् ॥ ननु सगुणोपासनयापि "यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" "तं यथा यथोपासते तथैव भवति" इत्यादि श्रुतिषु ईश्वरभावापत्तिश्रवणात् सगुणनिर्गुणविद्याजन्यमुक्त्योः को भेद इति चेत्—अत्रोच्यते—सगुणोपासकानामखण्डतत्त्वसाक्षात्काराभावात् न अविद्यातत्कार्याहङ्कारादिनाशः । आवरणानपायात् न अखण्डस्वस्वरूपानन्दाभिव्यक्तिश्च । किन्तु तेषां सङ्कल्पमात्रात् परमेश्वरेण तुल्यस्वभोगोपयोग्यदिव्यदेहेन्द्रियवनितादिसृष्टिसामर्थ्ये सत्यपि स्वातन्त्र्येण निखिलजगदुत्पत्तिप्रलयादिसामर्थ्यं नास्त्येव । ते च सगुणब्रह्मलोकं गत्वा तत्रकृतश्रवणादिजन्यनिर्गुणब्रह्मसाक्षात्कारेण सम्पन्नाः सन्तः सगुणब्रह्मणैव सह क्रमेण मुच्यन्ते । वेदान्तश्रवणादिजन्याखण्डब्रह्मसाक्षात्कारेण सद्योमुक्तानां

तु निःसन्धिबन्धमीश्वरभावं प्राप्तानां यावत्सर्वमुक्ति जगत्सृष्ट्यादिसामर्थ्यं, सर्वमुक्तौ बिम्बभावनिवृत्त्या निर्विशेषब्रह्मात्मनावस्थितिश्चेति विशेष इति शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्देन्द्रसरस्वतीचरण-
कमलचञ्चरीकायमाणश्रीवासुदेवब्रह्मेन्द्रसरस्वतीविरचिते
शास्त्रसिद्धान्तलेशतात्पर्यसङ्ग्रहे
चतुर्थपरिच्छेदः सम्पूर्णः ॥

॥ सम्पूर्णश्चायं ग्रन्थः ॥